# जीवाभिगमोपनिषद्



थेरा भगवंतो
जीवाजीवाभिगमणाममज्झयणं
पण्णवइंसु

णमोत्थु णं समणस्स भगवओ महावीरस्स
श्रीप्रेम-भुवनभानु-पद्म-जयघोषसूरिभ्यो नमः

परमपूजनीयश्रीस्थविरभगवत्प्रणीत-
श्रीजीवाजीवाभिगमसूत्रस्य
सारसञ्चयरूपा

# जीवाभिगमोपनिषद्

• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक
प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः
प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः
श्री जिनशासन आराधना ट्रस्ट

| | | |
|---|---|---|
| મૂળ ગ્રંથ | : | **શ્રીજીવાજીવાભિગમસૂત્ર** |
| ભાષા | : | **અર્ધમાગધી** |
| ગ્રંથાગ્ર | : | **૪૭૫૦** |
| મૂળ ગ્રંથકાર | : | પરમપૂજનીય **શ્રીસ્થવિર** ભગવંત |
| સારસંચય | : | **જીવાભિગમોપનિષદ્** |
| ભાષા | : | **સંસ્કૃત** |
| સંચય + સંપાદન | : | પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પ.પૂ.આ.શ્રી **કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા |
| પઠન-પાઠનાધિકારી | : | ગુરુ અનુજ્ઞાત શ્રમણ ભગવંત |

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




## અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# ❀ પ્રકાશકીય ❀

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને...

અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

*લિ.*

***શ્રી જિનશાસન આરાધના ટ્રસ્ટ***


**ટ્રસ્ટીઓ**

શ્રી ચંદ્રકુમાર જરીવાલા શ્રી પુંડરીકભાઈ શાહ
શ્રી લલિતભાઈ કોઠારી શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

An Actual Study

જીવ
અને અજીવનું
ગહન
અને વાસ્તવિક
અધ્યયન થાય.

એ જ સમયે
બદલાઈ જાય
અનાદિનો
અવળો અભિગમ.

મળ્યું છે આલંબન
કરીએ અધ્યયન.

- આ૦ કલ્યાણબોધિસૂરિ

अथ

# जीवाभिगमोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्यं
चिनोमि जीवाभिगमे रहस्यम्॥

जिनमतं श्रद्दधन्तः स्थविरभगवन्तः प्रज्ञापितवन्तो **जीवाजीवाभिगमनामाध्ययनम्**। एतदभिगमश्च द्विविधः - **जीवाभिगमोऽजीवाभिगमश्च**।

**अजीवाभिगमो** द्विविधः - रूप्यजी० अरूप्यजी०। अरू. दशविधः - धर्मास्तिकायः, तद्देशः, तत्प्रदेशः, अधर्मास्तिकायः, तद्देशः, तत्प्रदेशः, आकाशास्तिकायः, तद्देशः, तत्प्रदेशः, अध्वसमयः।

रूप्यजी० चतुर्विधः - स्कन्धाः, तद्देशाः, तत्प्रदेशाः, परमाणुपुद्गलाः। ते समासतः पञ्चधा - वर्णपरिणताः, यावत् संस्थानपरिणताः।

**जीवाभिगमो** द्विविधः - संसारसमा-

पन्नजी० असंसारसमापन्नजी०। असं० द्विविधः - अनन्तरसिद्धासं०, परम्पर-सिद्धासं०। अनन्तरसिद्धासं० पञ्चदशविधः - तीर्थसिद्धा यावदनेकसिद्धाः। परम्पर-सिद्धासं० अनेकविधः - प्रथमसमयसिद्धा द्विसमयसिद्धा यावदनन्तसमयसिद्धाः।

**संसारसमापन्नजीवेषु नव प्रतिपत्तयः** - (१) द्विविधाः (२) त्रिविधाः, यावत् (९) दशविधाः संसारसमापन्नजीवाः।

**द्विविधाः**


- त्रसाः
- स्थावराः
  - पृथ्वीकायिकाः
    - सूक्ष्माः
      - पर्याप्ताः
      - अपर्याप्ताः
    - बादराः
      - श्लक्ष्णबादरपृ० — सप्तधा — कृष्णमृत्तिकादयः — प्रत्येकं पर्याप्तापर्याप्ततया द्विविधम्
      - खरबादरपृ० — चत्वारिंशद्विधाः — पृथ्वी, शर्करादयः — समासतः पर्याप्तापर्याप्ततया द्विविधाः
  - अप्कायिकाः
    - सूक्ष्माः
      - पर्या०
      - अपर्या०
    - बादराः — अनेकधा० — अवश्यायादयः — समासतः पर्या० द्विविधाः
  - वनस्पतिकायिकाः
    - सूक्ष्माः
      - पर्या०
      - अपर्या०
    - बादराः

॥ ५ ॥

- वनस्पतिकायिकाः बादराः
  - साधारणाः
    - अनेकविधाः
      - आलुक-मूलकादयः
        - समासतः पर्याप्तापर्याप्ततया द्विविधाः
  - प्रत्येकाः
    - द्वादशविधाः
      - वृक्ष गुल्मा इत्यादयः
        - एकास्थिकाः
          - अनेकविधाः
            - निम्बः, आम्र इत्यादयः
        - बहुबीजाः
          - अनेकविधाः
            - आमलकादयः

शेषं प्रज्ञापनावन्नेयम्

- त्रसाः
  - तेजस्कायिकाः
    - सूक्ष्माः
      - पर्या०
      - अपर्या०
    - बादराः
      - अनेकविधाः
        - अङ्गार-जालादयः
          - समासतः द्विविधाः
            - पर्या०
            - अपर्या०
  - वायुकायिकाः
    - सूक्ष्माः
      - पर्या०
      - अपर्या०
    - बादराः
      - अनेकविधाः
        - प्राचीनादयः
          - समासतो द्विविधाः
            - पर्या०
            - अपर्या०
  - औदारिकत्रसाः


औदारिकत्रसाः
द्वीन्द्रियाः
अनेकविधाः
शङ्खादयः
त्रीन्द्रियाः
अनेकविधाः
कुन्थिपिपीलिकादयः
चतुरिन्द्रियाः
अनेकविधाः
मक्षिकादयः
पञ्चेन्द्रियाः
सर्वेऽपि समासतो द्विविधाः
पर्या०
अपर्या०

॥ ७ ॥

- पञ्चेन्द्रियाः
  - नैरयिकाः
    - सप्तविधाः
      - रत्नप्रभानारकादयः
        - समासतः
          - द्विविधाः
            - प०
            - अप०
  - तिर्यञ्चः
    - सम्मूर्च्छिमाः
      - जलचराः
        - ५
          - मत्स्याः
          - कच्छपाः
          - ग्राहाः
          - मकराः
          - सुसुमाराः
      - स्थलचराः
        - चतुष्पदाः
          - एकखुराः
          - द्विखुराः
          - गण्डीपदाः
          - सनखपदाः
        - परिसर्पाः
      - खेचराः
        - चर्मपक्षी
          - वल्कुल्यादयः
        - लोमपक्षी
          - हंसादयः
        - समुग्दप०
        - विततप०
          - (समुग्दप०, विततप०:) समय-क्षेत्राद् बहिस्तात् ते भवन्ति।
    - गर्भजाः
      - सम्मूर्च्छिमवत् आसालिकावर्जं ज्ञेयम्
  - मनुष्याः
  - देवाः

॥ १ ॥

- परिसर्पाः
  - उरःपरिसर्पाः — ४
    - अहयः
      - दर्वीकराः — अनेकधा — आशीविषादयः
      - मुकुलिनः — अनेकधा — गोनसादयः
    - अजगराः
    - आसालिकाः
    - महोरगाः
  - भुजपरिसर्पाः

सर्वेऽप्येते समासतो द्विविधाः - पर्याप्ता अपर्याप्ताश्च। एतेषां शरीरादिगोचरविस्तरः श्रुतात् प्रभेदादिविस्तरश्च प्रज्ञापनातो विज्ञेयः। एवमग्रेऽप्यूह्यम्।

- मनुष्याः
  - सम्मूर्च्छिमाः
    - समयक्षेत्रे भवन्ति ।
  - गर्भजाः
    - कर्मभूमिकाः
    - अकर्मभूमिकाः
    - अन्तरद्वीपजाः
      - (सर्वे) समासतो द्विविधाः
        - पर्या०
        - अपर्या०

॥ १० ॥

- देवाः
  - भवनपतयः — १० — असुरादयः
  - वानमन्तरः — ८ — पिशाचादयः
  - ज्योतिष्काः — ५ — चन्द्रादयः
  - वैमानिकाः — २
    - कल्पोपपन्नाः — १२ — सौधर्मजादयः
    - कल्पातीताः — २
      - ग्रैवेयकजा
      - अनुत्तरजाः

**स्थावर-भवस्थितिः** - जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कृष्टतो २२००० वर्षाणि। **स्थावर-कायस्थितिः** - जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कर्षतोऽनन्तं कालम्, कालतोऽनन्ता उत्सर्पिण्यवसर्पिण्यः, क्षेत्रतोऽनन्ता लोकाः, असङ्ख्येया पुद्गलपरावर्त्ताः, ते पुद्गलपरावर्त्ता आवलिकाऽसङ्ख्येयभागगतसमयप्रमाणाः।

**त्रस-भवस्थितिः** - जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कर्षतः ३३ सागराः। **त्रस-कायस्थितिः**-जघन्येनान्तर्मुहूर्त्तम्, उत्क-

र्षतोऽसङ्ख्येयकालम्, **असङ्ख्येया उत्स-र्पिण्यवसर्पिण्यः** कालतः, क्षेत्रतोऽसङ्ख्येया लोकाः। एषा च कायस्थितिस्तेजोवायूनधिकृत्य, लब्धित्रसानां तु कतिपयवर्षाधिकसागरसहस्रद्वयप्रमाणेयं ज्ञेया।

**स्थावरस्यान्तरम्** - त्रसस्थितिकालः। **त्रसस्यान्तरम्** - जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कर्षतो वनस्पतिकालः।

सर्वस्तोकास्त्रसाः स्थावरा अनन्तगुणाः।

॥ १३ ॥

- त्रिविधाः
  - स्त्रियः
    - तिर्यकस्त्रियः
    - मनुष्यस्त्रियः
    - देवस्त्रियः
    - एतत्प्रभेदाः प्राग्वद्यथायोगं विज्ञेयाः
  - पुरुषाः (स्त्रीवन्नेयम्)
  - नपुंसकाः
    - नैरयिकन० — सप्तधा — रत्नप्रभानै० इत्यादयः
    - तिर्यग्योनिकन० — पञ्चधा — एकेन्द्रियन० इत्यादयः
    - मनुष्यन० — त्रिधा — कर्मभूमि० इत्यादयः

न द्वितीयकल्पात्परतो देवस्त्रियः। **स्त्रीस्थितिः** - जघन्यतोऽन्तर्मुहूर्त्तम्। उत्कर्षतः ५५ पल्योपमाः। स्त्रियास्तद्-भावापरित्यागः - जघन्यत एकसमयम्, उत्कर्षतो दशोत्तर**पल्योपमशतं** पूर्व-कोटिपृथक्त्वाधिकम्। सन्त्यत्रान्येऽप्या-देशाः, ते च श्रुताद्विज्ञेयाः, तिर्यक्स्त्र्यादि-स्थितयश्च। स्त्रीणामन्तरं जघन्य-तोऽन्तर्मुहूर्त्तम्, उत्कर्षतोऽनन्तं कालम्, वनस्पतिकालः।

| स्त्रियः | अल्पबहुत्वम् |
| --- | --- |
| मनुष्यस्त्रियः | सर्वस्तोकाः |
| तिर्यक्स्त्रियः | असङ्ख्येयगुणाः |
| देवस्त्रियः | असङ्ख्येयगुणाः |

| तिर्यक्स्त्रियः | अल्पबहुत्वम् |
| --- | --- |
| खेचर्यः | सर्वस्तोकाः |
| स्थलचर्यः | सङ्ख्येयगुणाः |
| जलचर्यः | सङ्ख्येयगुणाः |

| मनुष्यस्त्रियः | अल्पबहुत्वम् |
| --- | --- |
| अन्तर्द्वीपगाः | सर्वस्तोकाः |
| देवकुरूत्तरकुरुगाः<br>परस्परं तुल्याः | सङ्ख्येयगुणाः |
| हरिवर्ष-रम्यक्वर्षगाः | सङ्ख्येयगुणाः |
| हैमवतैरण्यवतगाः | सङ्ख्येयगुणाः |
| भरतैरवतगाः | सङ्ख्येयगुणाः |
| पूर्वापरविदेहगाः | सङ्ख्येयगुणाः |

| देवस्त्रियः | अल्पबहुत्वम् |
|---|---|
| वैमानिक्यः | सर्वस्तोकाः |
| भवनवासिन्यः | असङ्ख्येयगुणाः |
| वानमन्तर्यः | असङ्ख्येयगुणाः |
| ज्योतिष्क्यः | सङ्ख्येयगुणाः |

| स्त्रियः | अल्पबहुत्वम् |
|---|---|
| अन्तर्द्वीपमनुष्यस्त्रियः | सर्वस्तोकाः |
| देवकुरूत्तरकुरु० | सङ्ख्येयगुणाः |
| हरिवर्षरम्यक्० | सङ्ख्येयगुणाः |
| हैमवतैरण्यवत० | सङ्ख्येयगुणाः |

| स्त्रियः | अल्पबहुत्वम् |
| --- | --- |
| भरतैरवत० | सङ्ख्येयगुणाः |
| पूर्वापरविदेह० | सङ्ख्येयगुणाः |
| वैमानिक्यः | असङ्ख्येयगुणाः |
| भवनवासिन्यः | असङ्ख्येयगुणाः |
| खेचरतिर्यक्स्त्रियः | असङ्ख्येयगुणाः |
| स्थलचरति० | सङ्ख्येयगुणाः |
| जलचरति० | सङ्ख्येयगुणाः |
| वानमन्तर्यः | सङ्ख्येयगुणाः |
| ज्योतिष्क्यः | सङ्ख्येयगुणाः |

**स्त्रीवेदकर्मस्थितिः** - जघन्यतः सागरस्य सार्धः सप्तभागः, पल्यासङ्ख्येय-भागन्यूनः। उत्कर्षतः - १५ सागरकोटा-कोट्यः १५०० वर्षाण्यबाधा, अबाधान्यूना कर्मस्थितिः कर्मनिषेकः। कारीषाग्निसमानः स्त्रीवेदः।

**पुरुषस्थितिः** - जघन्यतोऽन्त-र्मुहूर्त्तम्, उत्कर्षतः - ३३ सागराः। पुरुषाणां तद्भावापरित्यागः - जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कर्षतः - सातिरेकं सागरोपमशत-पृथक्त्वम्। अन्तरम् - जघन्यत एकं समयम्, उत्कर्षेण वनस्पतिकालः।

| पुरुषाः | अल्पबहुत्वम् |
|---|---|
| अन्तर्द्वीपमनुष्यपुरुषाः | सर्वस्तोकाः |
| देवकुरुत्तरकुरुम० | सङ्ख्येयगुणाः |
| हरिवर्षरम्यकम० | सङ्ख्येयगुणाः |
| हैमवतहैरण्यवतम० | सङ्ख्येयगुणाः |
| भरतैरावतम० | सङ्ख्येयगुणाः |
| पूर्वापरविदेहम० | सङ्ख्येयगुणाः |
| अनुत्तरोपपातिकदेवपुरुषाः | असङ्ख्येयगुणाः |
| उपरितनग्रैवेयकदे० | सङ्ख्येयगुणाः |
| मध्यमग्रै० | सङ्ख्येयगुणाः |

| पुरुषाः | अल्पबहुत्वम् |
| --- | --- |
| अधस्तनग्रै० | सङ्ख्येयगुणाः |
| अच्युत० | सङ्ख्येयगुणाः |
| यावत् आनत० | सङ्ख्येयगुणाः |
| सहस्रार० | असङ्ख्येयगुणाः |
| महाशुक्र० | असङ्ख्येयगुणाः |
| यावत् ईशान० | असङ्ख्येयगुणाः |
| सौधर्म० | सङ्ख्येयगुणाः |
| भवन० | असङ्ख्येयगुणाः |
| खेचर० | असङ्ख्येयगुणाः |

| पुरुषाः | अल्पबहुत्वम् |
|---|---|
| स्थलचर० | सङ्ख्येयगुणाः |
| जलचर० | सङ्ख्येयगुणाः |
| वानमन्तर० | सङ्ख्येयगुणाः |
| ज्योतिष्क० | सङ्ख्येयगुणाः |

**पुरुषवेदकर्मबन्धस्थितिः -**

जघन्यतोऽष्टसंवत्सराणि, उत्कर्षतः १० सागरकोटाकोट्यः। दश वर्षशतान्यबाधा। अबाधोना कर्मस्थितिः कर्मनिषेकः। दवाग्निज्वालासमानः पुरुषवेदः।

**नपुंसकस्थितिः** - जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कर्षतः - ३३ सागराः। नपुंसकानां तद्भावापरित्यागः - जघन्यत एकं समयम्, उत्कर्षतः - तरुकालः। नपुंसकस्यान्तरम् - जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कर्षतः साधिकसागरशतपृथक्त्वम्।

| **नपुंसकाः** | **अल्पबहुत्वम्** |
| --- | --- |
| मनुष्यनपुंसकाः | सर्वस्तोकाः |
| नारक० | असङ्ख्येयगुणाः |
| तिर्यग्न० | अनन्तगुणाः |

| नपुंसकाः | अल्पबहुत्वम् |
|---|---|
| सप्तमपृथ्वीनैरयिकन० | सर्वस्तोकाः |
| षष्ठपृ० | असङ्ख्येयगुणाः |
| यावत् द्वितीयपृ० | असङ्ख्येयगुणाः |
| अन्तर्द्वीपमनुष्यनपुंसकाः | असङ्ख्येयगुणाः |
| देवकुरूत्तरकुरु० | सङ्ख्येयगुणाः |
| यावत् पूर्वापरविदेह० | सङ्ख्येयगुणाः |
| रत्नप्रभापृ० | असङ्ख्येयगुणाः |
| खेचर० | असङ्ख्येयगुणाः |
| स्थलचर० | सङ्ख्येयगुणाः |

| नपुंसकाः | अल्पबहुत्वम् |
| --- | --- |
| जलचर० | सङ्ख्येयगुणाः |
| चतुरिन्द्रिय० | विशेषाधिकाः |
| त्रीन्द्रिय० | विशेषाधिकाः |
| द्वीन्द्रिय० | विशेषाधिकाः |
| तेजस्कायिक० | असङ्ख्येयगुणाः |
| पृथ्वीकायिक० | विशेषाधिकाः |
| अप्कायिक० | विशेषाधिकाः |

| | |
|---|---|
| वायुकायिक० | विशेषाधिकाः |
| वनस्पतिका० | अनन्तगुणाः |

**नपुंसकवेदकर्मस्थितिः** - जघन्यतः २/७ सागरः पल्योपमासङ्ख्येयभागोनः, उत्कर्षतः - २० सागरकोटाकोट्यः। अबाधा - २००० वर्षाणि। अबाधोना स्थितिः कर्मनिषेकः। महानगरदाहसमानो नपुंसकवेदः।

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| पुरुषाः | सर्वस्तोकाः |
| स्त्रियः | सङ्ख्येयगुणाः |
| नपुंसकाः | अनन्तगुणाः |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| अन्तर्द्वीपमनुष्यस्त्री-पुरुषाः | द्वावपि तुल्यौ सर्वस्तोकाः |
| देवकुरूत्तरकुरुस्त्री-पुरुषाः | द्वावपि तुल्यौ सङ्ख्येयगुणाः |
| हरिवर्षरम्यकस्त्री-पुरुषाः | द्वावपि तुल्यौ सङ्ख्येयगुणाः |
| हैमवतैरण्यवतमनुष्यस्त्री-पुरुषाः | द्वावपि तुल्यौ सङ्ख्येयगुणाः |
| भरतैरवतमनुष्यपुरुषाः | द्वावपि तुल्यौ सङ्ख्येयगुणाः |
| भरतैरवतमनुष्यस्त्रियः | द्वावपि तुल्याः संख्येयगुणाः |
| पूर्वापरविदेहमनुष्यपुरुषाः | द्वावपि तुल्यौ सङ्ख्येयगुणाः |
| पूर्वापरविदेहमनुष्यस्त्रियः | द्वावपि तुल्याः सङ्ख्येयगुणाः |
| अनुत्तरोपपातिकदेवपुरुषाः | असङ्ख्येयगुणाः |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| उपरितनग्रैवेयकदेवपुरुषाः | सङ्ख्येयगुणाः |
| यावत् आनतदेवपुरुषाः | सङ्ख्येयगुणाः |
| सप्तमपृथ्वीनैरयिकनपुंसकाः | असङ्ख्येयगुणाः |
| षष्ठपृ० | असङ्ख्येयगुणाः |
| सहस्रारदेवपुरुषाः | असङ्ख्येयगुणाः |
| महाशुक्रदेवपुरुषाः | असङ्ख्येयगुणाः |
| पञ्चमपृथ्वीनैरयिकनपुंसकाः | असङ्ख्येयगुणाः |
| लान्तकदेवपुरुषाः | असङ्ख्येयगुणाः |
| चतुर्थपृथ्वीनैरयिकनपुंसकाः | असङ्ख्येयगुणाः |
| ब्रह्मलोकदेवपुरुषाः | असङ्ख्येयगुणाः |
| तृतीयपृथ्वीनैरयिकनपुंसकाः | असङ्ख्येयगुणाः |
| माहेन्द्रदेवपुरुषाः | असङ्ख्येयगुणाः |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| सनत्कुमारदेवपुरुषाः | असङ्ख्येयगुणाः |
| द्वितीयपृथ्वीनैरयिकनपुंसकाः | असङ्ख्येयगुणाः |
| अन्तर्द्वीपमनुष्यनपुंसकाः | असङ्ख्येयगुणाः |
| यावद् विदेह० | सङ्ख्येयगुणाः |
| ईशानदेवपुरुषाः | असङ्ख्येयगुणाः |
| ईशानदेवस्त्रियः | सङ्ख्येयगुणाः |
| सौधर्मदेवपुरुषाः | सङ्ख्येयगुणाः |
| सौधमदेवस्त्रियः | सङ्ख्येयगुणाः |
| भवनवासिदेवपुरुषाः | असङ्ख्येयगुणाः |
| भवनवासिदेवस्त्रियः | सङ्ख्येयगुणाः |
| रत्नप्रभानैरयिकनपुंसकाः | असङ्ख्येयगुणाः |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| खेचरतिर्यग्योनिपुरुषाः | सङ्ख्येयगुणाः |
| खेचरतिर्यग्योनिस्त्रियः | सङ्ख्येयगुणाः |
| स्थलचरतिर्यग्योनिपुरुषाः | सङ्ख्येयगुणाः |
| स्थलचरतिर्यग्योनिस्त्रियः | सङ्ख्येयगुणाः |
| जलचरतिर्यग्योनिपुरुषाः | सङ्ख्येयगुणाः |
| जलचरतिर्यग्योनिस्त्रियः | सङ्ख्येयगुणाः |
| वानमन्तरदेवपुरुषाः | सङ्ख्येयगुणाः |
| वानमन्तरदेवस्त्रियः | सङ्ख्येयगुणाः |
| ज्योतिष्कदेवपुरुषाः | सङ्ख्येयगुणाः |
| ज्योतिष्कदेवस्त्रियः | सङ्ख्येयगुणाः |
| खेचरतिर्यग्योनिकनपुं. | सङ्ख्येयगुणाः |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| स्थलचरतिर्यग्योनिनपुं० | सङ्ख्येयगुणाः |
| जलचरतिर्यग्योनिनपुं० | सङ्ख्येयगुणाः |
| चतुरिन्द्रियनपुं० | विशेषाधिकाः |
| त्रीन्द्रियनपुं० | विशेषाधिकाः |
| द्वीन्द्रियनपुं० | विशेषाधिकाः |
| तेजस्कायिकनपुं० | असङ्ख्येयगुणाः |
| पृथ्वीकायिकनपुं० | विशेषाधिकाः |
| अप्कायिकनपुं० | विशेषाधिकाः |
| वायुकायिकनपुं० | विशेषाधिकाः |
| वनस्पति० नपुं० | अनन्तगुणाः |

तिर्यक्स्त्रियस्तत्पुरुषेभ्यस्त्रिगुणास्त्रि-रूपाधिकाः। मनुष्यस्त्रियस्तत्पुरुषेभ्यः सप्त-विंशतिगुणाः सप्तविंशतिरूपाधिकाः। देव-स्त्रियस्तत्पुरुषेभ्यो द्वात्रिंशद्गुणा द्वात्रिंशद्रू-पाधिकाः।

| क्रमः | नरकनाम | बाहल्यम् | नरकावासाः |
|---|---|---|---|
| १ | घम्मा | १,८०,००० यो० | ३० लक्षाणि |
| २ | वंशा | १,३२,००० यो० | २५ लक्षाणि |
| ३ | शैला | १,२८,००० यो० | १५ लक्षाणि |
| ४ | अञ्जना | १,२०,००० यो० | १० लक्षाणि |
| ५ | रिष्टा | १,१८,००० यो० | ३ लक्षाणि |
| ६ | मघा | १,१६,००० यो० | ९९,९९५ |
| ७ | माघवती | १,०८,००० यो० | ५ |

| घनोदधि-वलयः | घनवात-वलयः | तनुवात-वलयः | ओघेन (लोकान्ततोऽन्तरम्) |
| --- | --- | --- | --- |
| ६ यो. | ४ १/२ यो. | १ १/२ यो. | १२ यो. |
| ६ १/३ यो. | ४ ३/४ यो. | १ ७/१२ यो. | १२ २/३ यो. |
| ६ २/३ यो. | ५ यो. | १ २/३ यो. | १३ यो. १/३ यो. |
| ७ यो. | ५ १/४ यो. | १ ३/४ यो. | १४ यो. |
| ७ १/३ यो. | ५ १/२ यो. | १ ५/६ यो. | १४ २/३ यो. |
| ७ २/३ यो. | ५ ३/४ यो. | १ ११/१२ यो. | १५ १/३ यो. |
| ८ यो. | ६ यो. | २ यो. | १६ यो. |

| क्रमः | घनोदधिः | घनवातः | तनुवातः | आकाशान्तरम् |
|---|---|---|---|---|
| १ | २०००० यो. | असङ्ख्येययो. | असङ्ख्येययो. | असङ्ख्येययो. |
| २ | २०००० यो. | असङ्ख्येययो. | असङ्ख्येययो. | असङ्ख्येययो. |
| ३ | २०००० यो. | असङ्ख्येययो. | असङ्ख्येययो. | असङ्ख्येययो. |
| ४ | २०००० यो. | असङ्ख्येययो. | असङ्ख्येययो. | असङ्ख्येययो. |
| ५ | २०००० यो. | असङ्ख्येययो. | असङ्ख्येययो. | असङ्ख्येययो. |
| ६ | २०००० यो. | असङ्ख्येययो. | असङ्ख्येययो. | असङ्ख्येययो. |
| ७ | २०००० यो. | असङ्ख्येययो. | असङ्ख्येययो. | असङ्ख्येययो. |

रत्नप्रभादिपृथ्व्यस्तद्घनवातादयश्च झल्लरीसंस्थानाः। रत्नप्रभादिपृथ्व्योऽसङ्ख्येययोजनसहस्राण्यायामविष्कम्भाभ्यां परिक्षेपेण च। उत्पन्नपूर्वाः सर्वजीवा रत्नप्रभादिसर्वपृथ्वीषु। सर्वपुद्गलैः परित्यक्तपूर्वाश्च रत्नप्रभादिपृथ्व्यः।

रत्नप्रभायामुपर्येकयोजनसहस्रं वर्जयित्वाऽधस्तादपि चैकयोजनसहस्रं वर्जयित्वा मध्ये नरकावासा भवन्ति। ते चान्तवृत्ता बहिश्चतुरंसाः। एवमितरास्वपि वाच्यम्।

**द्विविधा रत्नप्रभायां नरकाः** - आवलिकाप्रविष्टाः, आवलिकाबाह्याश्च। आवलिकाप्रविष्टास्त्रिविधाः - वृत्ताः, त्र्यंसाः, चतुरंसाः। तद्बाह्यास्त्वयःकोष्ठादिनानासंस्थानसंस्थिताः। एवं यावत्तमायाम्। सप्तम्यां द्विविधा नरकाः - वृत्तास्त्र्यंसाश्च। सर्वास्वपि पृथ्वीसु नरकबाहल्यम् - ३००० यो. तद्यथा- अधस्ताद् घनाः सहस्रम्, मध्ये शुषिराः सहस्रम्, उपरि च सङ्कुचिताः सहस्रम्। सङ्ख्येयविस्तरा नरकाः सङ्ख्येययोजनसहस्राणि आयामविष्कम्भाभ्याम्, परिक्षेपेणापि। असङ्ख्ये-

यविस्तरा नरकास्त्वसङ्ख्येययोजनसहस्रा-ण्यायामविष्कम्भाभ्याम्, परिक्षेपेण च। एवं यावत्तमायाम्। सप्तम्यां सङ्ख्येयविस्तरो नरक एकयोजनलक्षमायामविष्कम्भाभ्याम्, परिक्षेपेण च साधिकयोजनलक्षत्रयम्। अ-सङ्ख्येयविस्तराश्च नरका असङ्ख्येययो-जनशतसहस्राण्यायामविष्कम्भाभ्याम्, परिक्षेपेण च।

**रत्नप्रभादिपृथ्वीनां वर्णः** - उत्त्रासकः परमकृष्णः। **गन्धः** - कुथितश्वमृतकादेर-प्यनिष्टतरः। **स्पर्शः** - असिपत्रा-देरप्यनिष्टतरः।

# सर्वपृथ्वीसु नरका वज्रमयाः।

| जीवाः | उत्कृष्टतो नरकगतिः |
| --- | --- |
| असञ्ज्ञिनः | १. |
| सरीसृपाः | २ |
| पक्षिणः | ३ |
| सिंहाः | ४ |
| सर्पाः | ५ |
| स्त्रियः | ६ |
| मत्स्या मनुष्याश्च | ७ |

रत्नप्रभायामेकसमयेनैकादयो यावदसङ्ख्येया उत्पद्यन्ते नारकाः। एवं यावत् सप्तम्याम्। प्रतिसमयमपह्रियमाणा रत्नप्रभानारका असङ्ख्येयोत्सर्पिण्यवसर्पिणीसमयैरपह्रियन्तेऽसत्कल्पनया। एवं यावत् तमस्तमानारकाः।

| नरक क्रमः | जघन्यावगाहना | उत्कृष्टावगाहनाः | | |
|---|---|---|---|---|
| | | धनूंषि | हस्ताः | अङ्गुलानि |
| १ | अङ्गुलासङ्ख्येयभागः | ७ | ३ | ६ |
| २ | अङ्गुलासङ्ख्येयभागः | १५ | २ | १२ |
| ३ | अङ्गुलासङ्ख्येयभागः | ३१ | १ | |
| ४ | अङ्गुलासङ्ख्येयभागः | ६२ | २ | |
| ५ | अङ्गुलासङ्ख्येयभागः | १२५ | | |
| ६ | अङ्गुलासङ्ख्येयभागः | २५० | | |
| ७ | अङ्गुलासङ्ख्येयभागः | ५०० | | |

सर्वास्वप्युत्तरवैक्रियजघन्यावगाहनाऽ-ङ्गुलसङ्ख्येयभागः। तदुत्कृष्टावगाहना च भवधारणीयशरीरावगाहनातो द्विगुणा ज्ञेया। अस्थ्यादिरहिततयाऽसंहननं तद्वपुः, हुण्ड-संस्थानं च। तद्वर्णः परमकृष्णः, गन्धः - अहिमृतकादेरप्यनिष्टतरः। स्पर्शतस्ते राजि-शतसङ्कुलया त्वचा विच्छवयः।

प्रत्येकनारकस्य सर्वोदधिजलेन सर्व-पुद्गलेनापि वाऽऽहृतेन न पिपासोपशमः क्षुधोपशमो वा सम्भवी। पृथ्वीपञ्चके नारका मुद्गरादि विकुर्व्य मिथोऽभिघ्नन्त उदीरयन्ति दुरध्यासां वेदनाम्। अन्त्य-

पृथ्वीद्वये तु वज्रमयतुण्डान् गोमयकीट-
समानान् महतो लोहितकुन्थून् विकुर्व्य
भक्षयन्त्यन्योऽन्यमारुहन्तोऽनुप्रविशन्तः
शरीरस्य मध्यभागेन सञ्चरन्तश्च।

निमेषमात्रकालेन विलीयेत घनाय-
स्पिण्ड उष्णनरकेषु। तद्वासिनारकोऽत्रो-
ल्कासहस्रं मुञ्चत्तप्तायआकरादौ यद्यव-
गाहेत तदासावपगतोष्णतातृष्णाक्षुधादि-
दुःखः सुखेन शयीत तत्र। एतद्वैपरीत्येन
शीतवेदनाऽपि ज्ञेया।

वासुदेवाः, जलचराः, माण्डलिकाः,
राजानः, महारम्भकुटुम्बिनश्च नरके गच्छ-

न्ति। **विकुर्वणाकालः - नरकेषु - अन्तर्मुहूर्त्तम्, तिर्यङ्मनुष्येषु** - ४ अन्तर्मुहूर्त्तानि, **देवेषु** - १५ दिनाः। उपपातेन, देवकर्मणा, अध्यवसानतः कर्मानुभावेन वाऽपि नारकस्य कस्यचित् कदाचिद् भवति सातवेदना।

भयोत्त्रस्तानां नारकानां तथाविध-प्रयत्नवशादुत्कर्षतः पञ्चयोजनशतान्युत्पातो भवति। नास्ति तेषामक्षिनिमीलनमात्रमपि सुखम्, दुःखमात्रस्य प्रतिबद्धत्वात्, अहो-निशं पच्यमानत्वात्तेषाम्। तेजःकार्मणशरी-राणि सूक्ष्मशरीराणि च जीवेन मुक्तमात्राणि सहस्रशो भेदं व्रजन्ति।

| तिर्यञ्चः | योनिसङ्ग्रहः | जातिकुल-कोटियोनि-प्रमुखलक्षाणि |
|---|---|---|
| खेचराः | ३-अण्डजाः, पोतजाः, संमूर्च्छिमाः | १२ |
| भुजपरिसर्पाः | ३-अण्डजाः, पोतजाः, संमूर्च्छिमाः | ९ |
| उरपरिसर्पाः | ३-अण्डजाः, पोतजाः, संमूर्च्छिमाः | १० |
| चतुष्पदाः | २ पोतजाः, संमूर्च्छिमाः | १० |
| जलचराः | ३ अण्डजाः, पोतजाः, संमूर्च्छिमाः | १२ १/२ |
| चतुरिन्द्रियाः | १ सम्मूर्च्छिमाः | ९ |
| त्रीन्द्रियाः | १ सम्मूर्च्छिमाः | ८ |
| द्वीन्द्रियाः | १ सम्मूर्च्छिमाः | ७ |

सप्त गन्धाः, सप्तगन्धशतानि। ४ **जलचराणाम्** + ४ **स्थलचराणाम्** + महावृक्षाणाम् + ४ महागुल्मिकानाम् = १६ पुष्पजातिकुलकोटियोनिप्रमुख-लक्षाणि। चत्वारो वल्ल्यः, चत्वारि वल्ली-शतानि। अष्टौ लताः, अष्टौ लताशतानि। त्रयो हरित्कायाः, त्रीणि हरितकायशतानि। वृन्तबद्धानां फलसहस्रम्। नालबद्धानां फलसहस्रम्। ते सर्वेऽपि भेदाः समवतरन्ति हरितकाय एव। एवं समनुगम्यमाना त्रसस्थावरयोरेव समवतरन्तीत्यशेषजीव-दृष्टान्तेन **चतुरशीतिजा**तिकुलकोटियोनि-

प्रमुखलक्षाणि भवन्ति।

| पृथ्वीभेदाः | जघन्या स्थितिः | उत्कृष्टा स्थितिः |
|---|---|---|
| श्लक्ष्णपृथ्वी | अन्तर्मुहूर्त्तम् | १००० वर्षाणि |
| शुद्धपृथ्वी | अन्तर्मुहूर्त्तम् | १२,००० वर्षाणि |
| वालुकापृथ्वी | अन्तर्मुहूर्त्तम् | १४,००० वर्षाणि |
| मनःशिलापृथ्वी | अन्तर्मुहूर्त्तम् | १६,००० वर्षाणि |
| शर्करापृथ्वी | अन्तर्मुहूर्त्तम् | १८,००० वर्षाणि |
| खरपृथ्वी | अन्तर्मुहूर्त्तम् | २२,००० वर्षाणि |

प्रत्युत्पन्नपृथ्वीकायिका जघन्यपदेऽ-सङ्ख्योत्सर्पिण्यवसर्पिणीभिरुत्कृष्टपदे-ऽप्य-सङ्ख्योत्सर्पिण्यवसर्पिणीभिर्निलेपाः

स्युः, जघन्यपदादुत्कृष्टपदेऽसङ्ख्येयगुणाः। एवं यावत् प्रत्युत्पन्नवायुकायिकाः। प्रत्युत्पन्नवनस्पतिकायिकानां नास्ति निर्लेपना। प्रत्युत्पन्नत्रसकायिकानां जघन्यपदे सागरोपमशतपृथक्त्वेन, उत्कृष्टपदेऽपि तावता भवेन्निर्लेपना, जघन्यपदादुत्कृष्टपदे विशेषाधिका।

अन्तर्द्वीपवक्तव्यता - दक्षिणजम्बूद्वीपे लघुहिमवत्पर्वतस्योत्तरपूर्वचरमान्ताल्लवणसमुद्रं ३०० योजनान्यवगाह्य तत्र दाक्षिणात्यैकोरुकमनुष्याणामेकोरुकनामा द्वीपः। स

चायामविष्कम्भाभ्यां ३०० योजनानि, परिक्षेपेण साधिकानि ९४९ योजनानि। तत्र पद्मवरवेदिका, वनषण्डः, तृणमणिप्रभृतिः, तिलकादिवृक्षाः, पद्मलतादयः, वनराजयः, मत्ताङ्गादयः १० कल्पवृक्षाश्च सन्ति। युगलिकमनुष्याश्च तत्रात्यन्तमद्भुतरूप-लावण्या दर्शनीयाः सुस्वरा निरातङ्का वज्रर्षभनाराचसंहननाः समचतुरस्रसंस्थाना उत्तमप्रशस्तातिशेषनिरुपमतनवोऽनुलोमवायुवेगाः कङ्कग्रहणी कपोतपरिणामाः पद्मोत्पल-सदृशगन्धनिःश्वाससुरभिवदना अष्टधनुः-शतमुच्छ्रिताश्च। तेषां ६४ पृष्ठकरण्डकाः।

प्रकृतिभद्रकत्वादिगुणोपेताः प्रतनुक्रोधादयस्ते यथेच्छितकामगामिनो भवन्ति।

पृथ्वीपुष्पफलाहारस्ते मनुष्याः। सा च पृथ्वी सुसंस्कृतगोक्षीरादपीष्टतरा भवति, चक्रिकल्याणभोजनादप्यधिकतर आस्वादनीये च ते पुष्पफले।

न तत्र ग्रामादयोऽस्यादिव्यवहारा वा। सत्स्वपि सुवर्णादिषु न तन्मनुष्याणां तेषु तीव्रो ममकारः। न तत्र राजादयो दासादयो वा। सत्स्वपि मातापित्रादिषु न तेषां तीव्रप्रेमबन्धनोत्पादः। न तत्र मित्रामित्रवि-

वाहेन्द्रादिमहोत्सवनटप्रेक्षणकादयः। न तत्र शकटादिवाहनान्यपि, पादचारित्वात्तेषाम्। न च सन्तोऽपि हस्त्यादय आगच्छन्ति तत्परिभोगम्। प्रकृतिभद्रकाश्च तत्र सिंहादिश्वापदा अपि। उद्भवन्ति तत्र शाल्यादीनि, न त्वागच्छन्ति तत्परिभोगम्। गर्त्तादिशून्यः बहुरमणीयस्तत्र भूभागः। न सन्ति च तत्र स्थाणुकण्टककचवरादीनि, दंशमशकादयो वा, सूर्योपराग-निर्घात-पांशुवृष्टि -विद्युद् - गर्जितादीनि वा, डिम्बडम्बर-महायुद्ध-रोग-मारि-अति-वृष्टिप्रभृतिर्वा। नापि तत्र छिन्नस्वामिकानि

हिरण्यादिविधानानि।

तत्र मनुष्यस्थितिः - जघन्येन पल्योपमासङ्ख्येयभागोऽसङ्ख्येयभागन्यूनः, उत्कर्षतः पल्योपमासङ्ख्येयभागः। षण्मासावशेषायुषस्ते मिथुनानि प्रसूय ४९ दिनानि यावत्तान् पालयित्वोच्छ्वस्य निःश्वस्य कासित्वा क्षुत्कृत्य कष्टमन्तरेण सुखं सुखेन कालं कृत्वाऽन्यतरदेवलोक उपपद्यन्ते। एवमन्येषामपि पञ्चपञ्चाशदन्तर्द्वीपानां वर्णनं यथायोगं ज्ञेयम्। कर्मभूम्यकर्मभूमिमनुजवर्णनं चोह्यं प्रज्ञा-

पनानुसारेण।

भवनपत्यादिदेवानां भवनादिवक्तव्यता स्थानपदानसारेण नेया, ज्ञेयं समिता-चण्डा-जातालक्षणं पर्षत्त्रयमसुरेन्द्रादेः, ईसा-त्रुटिका-दृढरथालक्षणं च पिशाचेन्द्रादेः, तुम्बा-त्रुटिका-प्रेत्यालक्षणं सूर्येन्द्रादेश्च।

जम्बूद्वीपलवणादयोऽसङ्ख्येया द्वीपसमुद्राः संस्थानत एकविधा विस्तारतो द्विगुणद्विगुणाः प्रत्येकं पद्मवरवेदिकावनषण्डपरिक्षिप्ताः स्वयम्भूरमणपर्यवसानाः।

तत्र सर्वक्षुल्लकः परिपूर्णचन्द्रसंस्थान-संस्थितो जम्बूद्वीपः। स चैकयोजनलक्ष-मायामविष्कम्भाभ्याम्, साधिकयोजनल-क्षत्रयं च परिक्षेपेण। परिक्षिप्तोऽसावेकया जगत्या। तदुच्चत्वं ८ यो०, मूले १२ यो० विष्कम्भो मध्ये ८ यो०, उपरि ४ यो०। एवं गोपुच्छसंस्थानसंस्थिता सर्ववज्रमयी दर्श-नीयैषा।

परिक्षिप्तैषा समन्ताज्जालकटकेन। तदुच्चत्वम् - १/२ यो०, विष्कम्भः ५०० धनूंषि। सर्वरत्नमयं प्रासादीयं च तत्।

जगत्या उपरि बहुमध्यभागे वज्र-रिष्ट-वैडुर्य-सुवर्णादिमयावयवा पद्मवरवेदिका। साऽपि हेमजालादिना परिक्षिप्ता। उच्चत्वम् - १/२ यो०, विष्कम्भः - ५०० धनूंषि। तत्र बहूनि गजतुरगादीनां युग्मानि सर्वरत्नमयानि। एवं हयपङ्क्त्यादयोऽपि। तत्र नागलता-अशोकलतादयोऽपि बहवोऽभिरूपाः। वेदिकायामनेकावयवेषु बहूनि पद्मोत्पलादीनि, अतः सा पद्मवरवेदिकेत्युच्यते। नित्या चैषा।

जगत्या उपरि पद्मवरवेदिकाया बहि-

स्तान् महानेको वनषण्डो देशोनयोजनद्वय-चक्रवालविष्कम्भः। तदन्तर्बहुसमरमणीय-भूभागः। स चोत्कृष्टवर्णाद्युपेततृणमणि-भिरुपशोभितः। बह्व्यस्तत्र वापि-कादयः। रजतकूलाः, वज्रमयपाषाणाः, तपनीयमयतलाश्च ताः, नानामणितीर्थ-सुबद्धाश्च। शोभितास्ताः स्वच्छसलिलेन प्रभूतोत्पलादिभिश्च। ताः काश्चिदासवोदाः, काश्चिद्वारुणोदाः, काश्चित् क्षीरोदाः, काश्चिद् घृतोदाः, काश्चिदिक्षूदाः, काश्चिदुदकरसाः।

तासु नानारत्नमयास्त्रिसोपानप्रति-

रूपकाः। तत्पुरतस्तोरणाः। तदुपर्यष्टाष्टमङ्गलानि, पञ्चवर्णचामरध्वजाः, छत्राणि, पताकाः, घण्टा-चामराणां युग्मानि, उत्पलादिहस्तकाश्च सर्वरत्नमयाः।

बहवो तत्र हंसासनादियुता उत्पादादिपर्वताः कदल्यादिगृहाणि च तद्युतानि। बहवश्च तत्र नागलतादिमया मण्डपा हंसासनादिसंस्थितसर्वरत्नमय-मृदु-नवनीतस्पर्शपृथ्वीशिलापट्टकयुताः। बहवस्तत्र वानमन्तरदेवदेव्य आसन-शयनादि कुर्वन्त्यनुभवन्ति च पूर्वसुकृतफलम्।

एवं पद्मवरवेदिकाया अन्तरपि देशोनयोजनद्वयविष्कम्भो वनषण्डः।

जम्बूद्वीपद्वारचतुष्कम् - विजयम्, वैजयन्तम्, जयन्तम्, अपराजितम्। मन्दरस्य पूर्वदिशि ४५००० यो. गत्वा जम्बूद्वीपपूर्वपर्यन्ते विजद्वारम्। उच्चत्वम् - ८ यो०, विष्कम्भः - ४ यो०। प्रवेशेनापि - ४ यो०। श्वेतवर्णं तत्। नानारत्नमयाश्च तस्य स्तम्भाद्यवयवाः। तस्योभयपार्श्वे निषीदनस्थाने सर्वरत्नमये द्वे द्वे चन्दन-कलशपरिपाट्यौ नागदन्तपरिपाट्यौ च।

तेषां नागदन्तकानामुपर्यन्ये द्वे द्वे नागदन्त-परिपाट्यौ। तेषु नागदन्तकेषु रजतमय-सिक्ककाः, तेषु वैडुर्यरत्नमयधूपघट्यो वरगन्धेनाऽऽपूरयन्ति तद्देशम्।

विजयद्वारोभयपार्श्वयोर्निषीदनस्थाने द्वे द्वे शालभञ्जिकापरिपाट्यौ, द्वे द्वे जाल-कटके, द्वे द्वे घण्टापरिपाट्यौ, द्वे द्वे वनमालापरिपाट्यौ। द्वौ द्वौ पीठविशेषौ च। तेषु पीठविशेषेषु प्रासादावतंसकाः, उच्चत्वम् - ४ यो०, आयामविष्कम्भौ - २ यो०। तदन्तर्बहुसमरणीयभूभागो यावत्तृ-

णमणयः। तन्मध्ये मणिपीठिकाः, आयामविष्कम्भौ १ यो॰, बाहल्यम् ८ यो॰, तदुपरि नानामणिमयं सिंहासनम्, तदुपरि विजयदूष्यम्, तन्मध्ये वज्रमयाङ्कुशः, तस्मिन् कुम्भप्रमाणमुक्तामय मुक्तादाम, तच्चतुर्भिस्तदर्थोच्चत्वप्रमाणैर्मुक्तादामभिः समन्तात् परिक्षिप्तः। वातैः प्रकम्पमानास्ते मनोहरशब्देनाऽऽपूरयन्ति तद्देशम्। तेषु प्रासादावतंसकेषूपरि बहून्यष्टाष्टमङ्गलानि।

विजयद्वारस्योभयपार्श्वयोर्निषीदनस्थाने

द्वे द्वे तोरणे, तत्पुरो द्वे द्वे शालभञ्जिके, तत्पुरो द्वे द्वे नागदन्ते, तेषु सूत्रवृत्तलम्ब-मानमाल्यदामकलापाः। तोरणानां पुरतो द्वे द्वे नागदन्तकौ-हयसङ्घाटकौ, एवं पङ्क्तिवीथीमिथुनकान्यपि वाच्यानि। द्वे द्वे पद्मादिलते, चन्दनकलशौ, भृङ्गारौ, आदर्शकौ, वज्रनाभे स्थाले, फलादिपूर्णे पात्र्यौ, सुप्रतिष्ठके। द्वे द्वे च तोरणानां पुरतो मनोगुलिके। तयोः सुवर्णरुप्यमया फलकाः, तेषु वज्रमयनागदन्तकाः, तेषु रजतमयसिक्ककाः, तेषु बहवो वातकरकाः कृष्णादिसूत्रमयाऽऽच्छादनाः।

तेषां तोरणानां पुरतो द्वे द्वे चित्रे रत्नकरण्डके, हयकण्ठौ (हयकण्ठप्रमाणौ रत्नविशेषौ), गजकण्ठौ, किन्नरकण्ठौ, यावद् ऋषभकण्ठौ। तेषु हयकण्ठादिषु द्वे द्वे पुष्पचङ्गेर्यौ, माल्य-गन्ध-चूर्ण-वस्त्रा-ऽऽभरण-सिद्धार्थ-लोमहस्तचङ्गेर्यश्च सर्वरत्नमय्यः।

तेषां तोरणानां पुरतो द्वे द्वे सिंहासने, रुप्याच्छादने छत्रे, चामरे, तैलादि-समुद्गके च।

विजये द्वारेऽष्टशतं चक्रध्वजानाम्,

अष्टशतं मृगध्वजानाम्, एवं गरुड-रुरुक-छत्र-**पिचछ**-शकुनि-सिंह-वृषभ-चतुर्दन्त- हस्तिध्वजानामपि प्रत्येकमष्ट-शतम्। विजये द्वारे नव भौमाः, तेषु बहु-समरमणीयभूभागः, तृणमणयः, पद्मवर-वेदिकादि च। पञ्चमभौमे मध्यभागे सिंहासनं विजयदूष्यादियुतम्। तत्परितो विजयदेवसामानिकादीनां प्रत्येकं प्रत्येकं भद्रासनानि।

षोडशविधै रत्नैरुपशोभितो विजय-द्वारस्योपरितन आकारः। बहून्यष्टाष्टम-ङ्गलानि, पञ्चवर्णचामरध्वजाः, छत्राति-

छत्राणि च तत्र।

वसति विजयद्वारे विजयनामा महर्द्धिको देवः। स तत्र ४००० सामानिकनाम्, ४ अग्रमहिषीणाम्, ३ पर्षदाम्, ७ अनीकानाम्, ७ अनीकाधिपतीनाम्, १६००० आत्मरक्षदेवानाम्, विजयाराजधानीवास्तव्यबहुदेवदेवीनां चाधिपत्यादि कुर्वाणो दिव्यभोगान् भुञ्जानश्चविहरति, अतस्तद् विजयद्वारमुच्यते। **अथोत्तरं चैतच्छाश्वतमस्य नाम।**

विजया राजधानी विजयद्वारस्य पूर्व-

दिशि तिर्यगसङ्ख्येयद्वीपसागरान् व्यतिव्रज्यान्यस्मिन् जम्बूद्वीपे १२ योजनान्यवगाह्य व्यवस्थिता। आयामविष्कम्भौ - १२ यो., परिक्षेपः - साधिक ३७ यो०।

तत्प्राकारादिवर्णनम्, उपपातसभादिवर्णनम्, विजयदेवकृतजिनपूजावर्णनं च राजप्रश्नीयगतसूर्याभविमानादिवक्तव्यतावन्नेयम्। विजयदेवस्य तत्सामानिकानां च स्थितिरेकपल्योपमम्। एवं दक्षिणादौ वैजयन्तादिद्वार - देव - राजधानीवक्तव्यताऽपि नेया।

उत्तरकुरुमनुष्या एकोरुकवत्, नवरं २५६ पृष्ठकरण्डकाः, गव्यूतत्रयोच्छ्रयः, अष्टमभक्तस्याहारार्थोत्पादः, जघन्येनायुः - ३ पल्योपमानि पल्योपमासङ्ख्येयभागोनानि, उत्कर्षेणायुः - ३ पल्योपमानि। षड्विधास्ते मनुष्याः - पद्मगन्धाः, मृगगन्धाः, अममाः, सहाः, **तेजस्तकिनः**, **शनैश्चारिणः।**

**उत्तरकुरौ** सीतानद्युभयकुले कनकमयौ यमकपर्वतौ गोपुच्छसंस्थितौ। पद्मवरवेदिका, वनषण्डः, प्रासादावतंसकाश्च

तत्र, तद्वर्णोत्पलादियुतवाप्यादयश्च, यमक-**नामदेवौ** तत्र **महर्द्धिकौ**। यमकनाम्न्यौ तद्राजधान्यौ विजयराजधानीवज्ज्ञेया।

यमकपर्वतयोर्दक्षिणदिशि सीतानदी-मध्यभागे नीलवद्ध्रहः। रजतमयकूलः पद्म-वरवेदिका-वनषण्डपरिक्षिप्तश्च सः। तत्र त्रिसोपानप्रतिरूपका यावत्तरणानि च प्राग्वत्। तन्मध्य एकं महापद्मं वज्र-रिष्टा-दिमयावयवम्। तन्मध्ये बहुसमरमणीय-भूभागः, भवनम्, मणिपीठिका, देवशय-नीयं च। स्वार्धोच्चत्वप्रमाणाष्टशतपद्मैः

परिक्षिप्तम्, तान्यपि वज्रादिरत्नमयानि, तृणमणियुतबहुसमरमणीयभूभागश्च तेषामुपरि। तत्पद्मस्य **वायव्यादि**दिक्त्रये नीलवद्द्रहकुमारस्य **चतुःसामा**निकसहस्राणां **चतुःपद्मसा**हस्त्र्यः, एवं सर्वः परिवारो वाच्यः।

तत्पद्ममन्यैस्त्रिभिः पद्मवरपरिक्षेपैः सर्वतः समन्तात् परिक्षिप्तः। अभ्यन्तरे ३२ पद्मलक्षाणि, मध्यमे ४० पद्मलक्षाणि, बाह्ये ४८ पद्मलक्षाणि। एवमोघेन १ कोटिः २० लक्षाणि पद्मानाम्। नीलवत्प्रभानि तत्र

बहून्युत्पलादीनि, नीलवत्प्रभानि तत्र बहून्युत्पलादीनि, नीलवत्कुमारश्च तत्र देवः, अतोऽसौ नीलवद्द्रह इत्युच्यते। **अथोत्तरं चैतच्छाश्वतं नाम।**

ततः पूर्वस्यां पश्चिमायां च दिशि दश दश काञ्चनपर्वताः। ते च पद्मवरवेदिका, वनषण्डः, प्रासादावतंसकः, मणिपीठिका, सिंहासनं च सपरिवारम्, नामव्यपदेशहेत्वादि च प्राग्वत्।

एवमुत्तरकुरुह्रदः, चन्द्रह्रदः, ऐरावत-

ह्रदः माल्यवद्ह्रदश्चापि ज्ञेयाः।

उत्तरकुरौ मन्दरस्योत्तरपूर्वस्यां जम्बूपीठम्। तच्च पद्मवरवेदिकावनषण्डाभ्यां परिक्षिप्तः। तस्योपरि बहुसमरमणीयभूभागः। तन्मध्यभागे मणिपीठिका। तदुपरि सुदर्शनापरनामा जम्बूवृक्षो वज्रादिरत्नमयः। तस्य पूर्वशाखायां भवनं मणिपीठिकादेवशयनीययुक्तम्। दक्षिणशाखायां प्रासादावतंसकः सपरिवारसिंहासनयुतः। एवं पश्चिमोत्तरशाखयोरपि प्रासादावतंसकः। उपरितनविडिमाया उपरि सिद्धायतनम्, तत्र

मणिपीठिकायां देवच्छन्दकेऽष्टशतजिन-प्रतिमाः।

मूले जम्बूवृक्षो द्वादशपद्मवरवेदिकाभिः परिक्षिप्तः। स्वार्धोच्चत्वप्रमाणैर्जम्बूवृक्षैरष्टशतसङ्ख्यैः सम्परिक्षिप्तो जम्बूवृक्षः। ततो **वायव्यादिदिक्त्रये** चतुःसामानिकसहस्राणां चतुःजम्बूसाहस्र्यः, एवं परिवारो वाच्यः।

त्रिभिर्वनषण्डैः सम्परिक्षिप्तो जम्बूवृक्षः। प्रथमवनषण्डे जम्बूवृक्षः। प्रथमवनषण्डे जम्बूवृक्षस्य चतुर्दिक्षु भवनम्,

नन्दापुष्करिण्यः, तन्मध्ये प्रासादावतंसकः। तद्भवनद्वयमध्यतनकूटेषु सिद्धायतनम्। एवमष्टसिद्धायतनानि।

बहुभिस्तिलकादिभिर्वृक्षैः परिवृतो जम्बूवृक्षः। तस्योपरि बहून्यष्टाष्टमङ्गलानि। सुदर्शनादिद्वादशतन्नामधेयानि। वसति तत्र जम्बूद्वीपाधिपतिरनादृतनामा पल्योपमस्थितिको महर्द्धिको देवः। अनादृता तद्राजधानी विजयावत्। बहवस्तत्र जम्बूवृक्षा जम्बूवनानि जम्बूवनषण्डाश्च नित्यकुसुमितत्वादिगुणोपेताः, अतोऽसौ

जम्बूद्वीपोऽभिधीयते, **अथोत्तरं चैतच्छाश्वतं नाम।**

जम्बूद्वीपे चन्द्रद्वयम्, सूर्यद्वयम्, ५६ नक्षत्राणि, १७६ ग्रहाः, १,३३,९५० कोटाकोट्यश्च ताराणाम्।

लवणसमुद्रो योजनलक्षद्वयश्चक्रवालविष्कम्भो वलयाकारश्च। पद्मवरवेदिकावनषण्डपरिक्षिप्तोऽसौ। धातकीखण्डद्वीपपूर्वाद्यर्धस्य पश्चिमादिभागे सीतोदादिनामुपरि तस्यापि विजयादिद्वाराणि। तानि च प्राग्वज्ज्ञेयानि। राजधान्यश्चान्यस्मिन्

लवणसमुद्रे।

लवणसमुद्रोदकमस्वच्छं रजोवत् लवणं क्षारं कटुकं चेति द्विपदादीनां तदपेयम्, नान्यत्र तद्योनिकसत्त्वानाम्। सुस्थितनामा तदधिपतिर्महर्द्धिकः पल्योपमस्थितिकः। अत एष लवणसमुद्र इत्युच्यते, शाश्वतं चैतन्नाम।

लवणसमुद्रे ४ चन्द्राः, ४ सूर्याः, ११२ नक्षत्राणि, ३५२ महाग्रहाः, २,६७,९०० कोटाकोट्यश्च ताराणाम्। लवणसमुद्रे वलयामुखाद्यभिधाना महापा-

तालकलशाः। वसन्ति तत्र कालादि-नामधेयाः पल्योपमस्थितिका महर्द्धिका देवाः। तन्महापातालकलशानामधस्तनत्रि-भागे वायुकायः, मध्यमत्रिभागे वायु-कायाप्कायौ, उपरितनत्रिभागेऽप्कायः।

अन्येऽपि बहवस्तत्र तत्र क्षुल्लक-पातालकलशाः। प्रत्येकं प्रत्येकमर्ध-पल्योपमस्थितिकदेवताभिस्ते परिगृहीताः। तेष्वपि भागत्रयं प्राग्वत्। ओघेन ७,८८४ क्षुल्लकपातालकलशाः। तत्कलशानाम-धस्तनमध्यमत्रिभागयोर्वातक्षोभतो जल-

स्योन्नमनेन चतुर्दश्यादौ लवणसमुद्रस्य वृद्ध्यादि भवति, द्विकृत्वश्चाहोरात्रमध्ये।

लवणशिखा १०,००० यो० - चक्रवालविष्कम्भा। सा देशोनार्धयोजनमतिरेकं वर्द्धते वा हीयते वा। लवणसमुद्रे ४२,००० नागा अभ्यन्तरवेलाम्, ७२,००० बाह्याम्, ६०,००० अग्रोदकं धारयन्ति। ओघेन १,७४,००० नागाः।

लवणसमुद्रे चतुर्दिक्षु गोस्तूपादिवेलन्धरनागराजचतुष्कस्याऽऽवासपर्वतचतुष्टम्। तच्च गोपुच्छसंस्थानसंस्थितम्। वाच्य-

मत्रापि पद्मवरवेदिकादि प्रासादावतंसकादि राजधानीवक्तव्यं च। प्रथमः पर्वतः कनकमयः, द्वितीयोऽङ्कमयः, तृतीयो रत्नमयः, तुर्यः स्फटिकमयः।

एवं सर्वरत्नमयमनुवेलन्धरराज्ञां ककोंटकादीनामप्यावासपर्वतचतुष्टयं ज्ञेयम्। जम्बूद्वीपमन्दरस्य पश्चिमदिशि लवणसमुद्रे १२००० यो० अवगाह्य लवणाधिपतेः सुस्थितदेवस्य गौतमद्वीपः। तत्र पद्मवरवेदिकादि प्राग्वत्। तन्मध्येऽतिक्रीडानामा भौमेयविहारः, तत्र बहुसमरमणीयभूभागः,

मणिपीठिका, देवशयनीयं च। गौतमप्रभाणि बहून्यत्रोत्पलादीनि, अतोऽसौ गौतमद्वीपः। नित्यं चैतन्नाम। गौतमद्वीपस्य पश्चिमदिशि तिर्यगसङ्ख्येयद्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् लवणसमुद्रे सुस्थिता राजधानी।

एवं मन्दरस्य पूर्वदिशि चन्द्रयोश्चन्द्रद्वीपौ ज्ञेयौ। पश्चिमदिशि सूर्ययोः सूर्यद्वीपौ। एवं लवणसमुद्रादिसत्कचन्द्रादेरपि द्वीपा वाच्या यावत् स्वयम्भूरमणसमुद्रचन्द्राणां तत्सूर्याणां च द्वीपाः।

लवणान्यबाह्यसमुद्रेषु न सन्ति वेलन्धरप्रभृतयः, नापि बाह्यसमुद्रेषु लवणवज्जलक्षोभादि, किन्तु परिपूर्णभृततया उल्लुठन्त इव तेऽक्षुभितजलाः। लवणे मेघसम्मूर्च्छनं वर्षा च भवति, न बाह्यसमुद्रेषु। बाह्यसमुद्राणां पूर्णभावो बहुजीवपुद्गलानां तेषूदकतया व्युत्क्रान्तियोगात्।

लवणसमुद्रस्योभयपार्श्वयोः ९५-९५ योजनानि गत्वा च १६ यो॰ उत्सेधवृद्धिः। उभयपार्श्वयोः ९५००० यो॰ गोतीर्थम्। १०,००० यो॰ गोतीर्थविरहितं क्षेत्रम्।

१६००० यो॰ उच्छ्र्या लवणउदकमाला, १०,००० यो॰ विस्तारा।

गोतीर्थ - नौ-शिल्पिसम्पुट-अश्व-स्कन्ध-वलभीसंस्थितो वृत्तो वलयाकारश्च लवणसमुद्रः। १००० यो॰ उद्वेधः। १६००० उत्सेधः। १७,००० यो॰ सर्वाग्रम्। नैष उत्पीलनादिनैकोदकं कुरुते, भरतैरवतादिगतार्हदाद्यनुभावात्।

एवं धातकीखण्डद्वीपादेरपि द्वारादि-वक्तव्यता वाच्या। जम्बूद्वीपाद् द्विगुणि-ताश्चन्द्राद्या लवणे। ततोऽपि त्रिगुणिता

धातकीखण्डे। धातकीखण्डप्रभृतिषु द्वीप-समुद्रेषु प्राक्तनद्वीपसमुद्रचन्द्रादेस्त्रिगुणिता-श्चन्द्रादय आदिमचन्द्रादिसहिता भवन्ति। यथा कालोदसागरे १२ x ३ = ३६ चन्द्राः + ६ आदिमचन्द्रा (जम्बूद्वीपस्य २ + लवणसागरस्य ४) = ४२ चन्द्राः।

एकशशीपरिवारे २८ नक्षत्राणि, ८८ ग्रहाः, ६६,९७५ कोटाकोट्यस्ताराः। अतो विवक्षितद्वीपग्रहादिसङ्ख्या उक्तसङ्ख्या-यास्तद्द्वीपशशिसङ्ख्यया गुणनेन प्राप्यते। समयक्षेत्राद् बहिश्चन्द्रात् सूर्यस्य सूर्याच्च

चन्द्रस्यान्तरं ५०,००० यो०। चन्द्रद्वयमध्ये सूर्यद्वयमध्ये त्वन्तरं योजनलक्षम्। ते च सुखलेश्या मन्दलेश्याश्च। तत्रावस्थिता योगाः सूर्यचन्द्राणाम्। चन्द्रा आभीचियुक्ताः सूर्याश्च पुष्ययुता भवन्ति।

समयक्षेत्रे कलम्बुकापुष्पसंस्थितं ज्योतिष्कं चारं चरति। चारविशेषेण मनुष्याणां सुखदुःखविधिर्भवति। नक्षत्रताराणामवस्थितानि मण्डलानि। सूर्यचन्द्राणामूर्ध्वमधो नास्ति सङ्क्रमः, तिर्यक् त्वभ्यन्तरबाह्यमस्ति मण्डलसङ्क्रमणम्।

सर्वबाह्यात्-आभ्यन्तरमण्डलं तेषां प्रविशता तापक्षेत्रं वर्द्धते, निष्क्रमतां तु हीयते। समयक्षेत्रे ज्योतिश्चक्रे मेरुं प्रदक्षिणीकुर्वच्चारं चरति। कृष्णराहुविमानेन प्रतिदिनं चन्द्रस्य द्वाषष्टिभागसत्काश्चतुरश्चतुरो भागा आच्छाद्यन्ते ततः कृष्णपक्षे तद्धानिः, तद्वैपरीत्याच्च शुक्लपक्षे तद्वृद्धिर्दृश्यते।

मानुषोत्तरपर्वतः - उच्चत्वम् -१७२१ यो०, उद्वेधः ४३० यो० + १ क्रोशः, विष्कम्भः - मूले १०२२ यो., मध्ये ७२३ यो०, उपरि ४२४ यो०। एवं सिंहनिषाद्येषः।

सम्परिक्षिप्तोऽसौ पद्मवरवेदिका-वनष-ण्डाभ्याम्। मानुषोत्तरपर्वतस्यान्तर्मनुष्याः, उपरि सुवर्णाः, बहिर्देवाः परिवसन्ति। न व्यतिव्रजन्त्येनं मनुष्याः कदापि, अन्यत्र चारणैर्विद्याधरैर्देवकर्मणा वा। अतोऽसौ मानुषोत्तर उच्यते, शाश्वतं चैतन्नाम।

यावद् गृहादि - ग्रामादि - अर्हदादि-समयावलिकादि-विद्युदादि - वर्षादि-बादराग्नि-नद्यादि-चन्द्रोपरागादि - चन्द्रा-दिचारास्तावदयं मनुष्यलोक इत्युच्यते।

चन्द्रादीन्द्रच्युतौ ४/५ सामानिका-

स्तत्स्थानमुपसम्पद्य विहरन्ति, यावन्नोपपद्यतेऽन्य इन्द्रः। तच्च स्थानं जघन्येनैकं समयम्, उत्कर्षेण षण्मासान् यावदुपपातविरहितं भवति।

प्रागुक्तरीत्या पुष्करवरद्वीप-पुष्करोदसमुद्र-वरुणवरद्वीप-वरुणोदसमुद्र-क्षीरवरद्वीप-क्षीरोदसमुद्र-घृतवरद्वीप-घृतोदसमुद्र-क्षोदवरद्वीप-क्षोदोदसमुद्र-वक्तव्यताऽपि वाच्या।

क्षोरोदसागरं नन्दीश्वरवरनामा द्वीपः सम्परिक्षिप्य स्थितः। तन्मध्ये चतुर्दिक्षु

सर्वाञ्जनमया गोपुच्छसंस्थिताः ८४००० योजनोच्चा अञ्जनपर्वताः। ते पद्मवर-वेदिकादियुताः। तेषूपरि सिद्धायतनम्। तस्य देवादिसुरचतुष्टयाधिष्ठितानि देवा-दिचतुर्द्वाराणि। तेषां चतुर्दिक्षु मुखमण्डपाः। तेषां चतुर्दिक्षु द्वाराणि। एवं प्रेक्षागृह-मण्डपाः, तेष्वक्षाटकाः, मणिपीठिकाः, सिंहासनानि, दामानि, स्तूपाः, जिन-प्रतिमाः, चैत्यवृक्षाः, महेन्द्रध्वजाः, चतुर्दिक्षु क्षोदरसपूर्णा नन्दापुष्करिण्यश्च।

४८००० मनोगुलिकाः (पीठिकाः)

४८००० गोमानुष्यः (शय्याविशेषाः)

मणिपीठिकानामुपरि देवच्छन्दकाः, तेष्व-
ष्टशतजिनप्रतिमाः।

प्रत्येकाञ्जनपर्वतस्य चतुर्दिक्षुनन्दा-
पुष्करिण्यः, तत्प्रत्येकमध्ये रत्नमया
पल्यकसंस्थिता दधिमुखपर्वताः। ८४०००
योजनोच्चाः, सर्वत्र समाः, उद्वेधः - १०००
यो०, तेषामुपर्यपि सिद्धायतन-मञ्जनपर्वत-
सिद्धायतनवत्।

तत्र बहवश्चतुर्निकाया देवा चातुर्मा-
सिकीप्रतिपत्सु संवत्सरीस्वन्येष्वपि जिन-

जन्मनिष्क्रमज्ञानोत्पत्तिपरिनिर्वाणादिषु देव-कार्येषु देवसमुदयेषु देवमवायेषु समुपागताः सन्तः प्रमुदितप्रक्रीडिता अष्टाह्निका महा-महिमा कुर्वन्तः पालयन्तश्च विहरन्ति। कैलासहरिवाहननामदेवद्वयं महर्द्धिकं पल्योपमस्थितिकं तत्र वसति।

ततोऽपि नन्दीश्वरोदसमुद्र-अरुणद्वीप-अरुणोदसमुद्र-अरुणवरावभासद्वीपवक्त-व्यता, एवं त्रिप्रत्यवतारेण कुण्डलाद्यस-ङ्ख्यद्वीपसागरवक्तव्यता यावत्स्वयम्भूर-मणसमुद्रः।

तेष्वसङ्ख्येया जम्बूद्वीपा असङ्ख्येया लवणसमुद्रा एवं धातकी-खण्डादीनप्याश्रित्य वाच्यम्।

नवरमन्त्यपञ्चकं देव-नाग-यक्ष-भूत-स्वयम्भूरमणद्वीपसागरलक्षणमेकं ज्ञेयम्।

| **सागरः** | **जलरसः** |
|---|---|
| लवणः | लवणः, कटुकः |
| कालोदः | माषराशिवर्ण उदकरसः |
| पुष्करोदः | स्फटिवर्ण उदकरसः |
| वरुणोदः | वारुणीरसः |
| क्षीरोदः | क्षीररसः |
| घृतोदः | घृतरसः |

| सागरः | जलरसः |
|---|---|
| क्षोदोदः | इक्षुरसः |
| स्वयम्भूरमणः | स्फटिकवर्ण उदकरसः |
| शेषसर्वसागराः | इक्षुरसः |

लवण-कालोद-स्वयम्भूरमणा बहु-मत्स्यकच्छपाद्याकीर्णाः।

| सागरः | मत्स्यजातिकुलकोटि-योनिप्रमुखलक्षाणि |
|---|---|
| लवणः | ७ |
| कालोदः | ९ |
| स्वयम्भूरमणः | १२ १/२ |

| सागरः | मत्स्यावगाहना | |
|---|---|---|
| | जघन्याः | उत्कृष्टा |
| लवणः | अङ्गुलासङ्ख्यभागः | ५०० यो. |
| कालोदः | अङ्गुलासङ्ख्यभागः | ७०० यो. |
| स्वयम्भूरमणः | अङ्गुलासङ्ख्यभागः | १००० यो. |

यावन्ति लोके शुभनामधेयानि तावन्तो द्वीपसमुद्रा नामधेयैः प्रज्ञप्ताः। यावन्तश्च २ १/२ सागरोपमानामुद्धार-समयास्तावन्तो द्वीपसमुद्रा उद्धारसमयैः प्रज्ञप्ताः। पृथ्व्यब्जीवपुद्गलपरिणामा द्वीप-सागराः। सर्वजीवा पृथ्वीकायिकतया यावत्त्रसकायिकतया सर्वद्वीपसागरेष्व-

सकृदथवाऽनन्तकृत्व उत्पन्नपूर्वाः।

चन्द्रसूर्ययोरधस्तात्सममुर्ध्वं च तारा-रूपाश्चन्द्रसूर्ययोर्हीनास्तुल्या वाऽपि भवन्ति। तुल्यत्वं च प्राक्कृततपोनियमब्रह्मचर्योत्कट-त्ववशादुपपन्नम्।

मन्दरात् ११२१ योजनाबाधया ज्योतिश्चारः। लोकान्तात् ११११ योजनाबाधया ज्योतिष्कं प्रज्ञप्तम्। रत्नप्रभापृथ्व्या बहु-समरमणीयभूभागात् सर्वाधस्तनतारारूपं ७९० यो०, सूर्यः ८०० यो०, चन्द्रः ८८० यो०, सर्वोपरितनतारारूपं ९०० यो०। एवं

११० यो॰ बाहल्ये तिर्यगसङ्ख्येयज्योतिर्विषयाः प्रज्ञप्ताः। जम्बूद्वीपे सर्वाभ्यन्तरं चारमभीचिनक्षत्रम्, मूलं सर्वबाह्यम्, स्वातिः सर्वोपरितनम्, भरणी च सर्वाधस्तनं चरति चारम्।

उत्तानीकृतार्धकपित्थाऽऽकारं सर्वस्फटिकमयमभ्युद्गतोत्सृतप्रभासितं च चन्द्रसूर्यनक्षत्रताराविमानम्।

| विमानम् | आयामविष्कम्भौ | बाहल्यम् |
|---|---|---|
| चन्द्रः | ५६/६१ यो॰ | २८/६१ यो॰ |
| सूर्यः | २४/६१ यो॰ | २४/६१ यो॰ |

| विमानम् | आयामविष्कम्भौ | बाहल्यम् |
|---|---|---|
| ग्रहः | १/२ यो० | १ क्रोशः |
| नक्षत्रम् | १ क्रोशः | १/२ क्रोशः |
| तारा | १/२ क्रोशः | ५०० धनूंषि |

| विमानम् | परिवहकदेवसङ्ख्या | | | |
|---|---|---|---|---|
| | पूर्वदिशि सिंहरूपाः | दक्षिणदिशि गजरूपाः | पश्चिमदिशि वृषभरूपाः | उत्तरदिशि हयरूपाः |
| चन्द्रः | ४००० | ४००० | ४००० | ४००० |
| सूर्यः | ४००० | ४००० | ४००० | ४००० |
| ग्रहः | २००० | २००० | २००० | २००० |
| नक्षत्रम् | १००० | १००० | १००० | १००० |
| ताराः | ५०० | ५०० | ५०० | ५०० |

| तार-योरन्तरं | व्याघातिमम् | | निर्व्याघातिकम् | |
|---|---|---|---|---|
| | जघ. | उत्कृ. | जघ. | उत्कृ. |
| | २६६ यो. | १२,२४२ यो. | ५०० धनूंषि | २ गव्यूते |

चन्द्रस्य चन्द्रभाद्यग्रमहिषीचतुष्कम्। प्रत्येका चतुःसहस्ररूपविकुर्वणाप्रत्यला। तत् १६००० देवीरूपं तुटिकम् (अन्तः-पुरम्) नासौ चन्द्रावतंसके विमाने सुधर्मायां तेन सह भोगान् भुङ्क्ते जिनसक्थ्या-शातनाभयात्। एतच्च मैथुनमाश्रित्य ज्ञेयम्, न दिव्यगीतप्रभृतिभोगमाश्रित्य।

सूर्यस्य सूर्यप्रभाद्यग्रमहिषीचतुष्कम्।

ग्रहादिसर्वेषां विजयाद्यग्रमहिषीचतुष्कम्।

| ज्योतिष्काः | अल्पबहुत्वम् |
| --- | --- |
| चन्द्र-सूर्याः | तुल्या द्वयेऽपि |
| | सर्वस्तोकाः |
| नक्षत्राणि | सङ्ख्येयगुणाः |
| ग्रहाः | सङ्ख्येयगुणाः |
| ताराः | सङ्ख्येयगुणाः |

शक्रादीन्द्राणां समिता-चण्डा-जाता-लक्षणं पर्षत्त्रयं तद्गतदेवदेवीसङ्ख्या-तदायुश्च यथायोगं विज्ञेयम्। वाच्यं च सौधर्मादिसर्वसुरस्थानं स्थानपदानुसारेण।

| कल्पः | विमानपृथ्वी किम्प्रतिष्ठिता ? |
|---|---|
| १-२ | घनोदधि० |
| ३-४ | घनवात० |
| ५ | घनवात० |
| ६ | तदुभय० |
| ७-८ | तदुभय० |
| ९-अनुत्तराः | अवकाशान्तर० |

| कल्पः | विमानपृथ्वी-बाहल्यम् | विमानवर्णः | किम्मयानि विमानानि ? |
|---|---|---|---|
| १-२ | २७०० यो. | पञ्चवर्णानि | सर्वरत्नमयानि |
| ३-४ | २६०० यो. | ४ (कृष्णवर्जानि) | सर्वरत्नमयानि |
| ५-६ | २५०० यो. | ३ (नीलवर्जानि) | सर्वरत्नमयानि |
| ७-८ | २४०० यो. | २ (लोहितवर्जानि) | सर्वरत्नमयानि |
| ९-१२ | २३०० यो. | १ (हारिद्रवर्जानि शुक्लानि) | सर्वरत्नमयानि |
| ग्रैवे. | २२०० यो. | १ (हारिद्रवर्जानि शुक्लानि) | सर्वरत्नमयानि |
| अनु. | २१०० यो. | परमशुक्लानि | सर्वरत्नमयानि |

ग्रैवेयकं यावदावलिकाप्रविष्टानि विमानानि त्रिविधानि - वृत्तानि, त्र्यंसानि, चतुरंसानि च। तद्बाह्यानि नाना-संस्थानानि। अनुत्तराणि तु द्विविधानि- वृत्तं त्र्यंसानि च।

सौधर्मे देवा एकसमय एकादयो यावदसङ्ख्येया उपपद्यन्ते। एवं सहस्रारं यावत्। तत्परतः सर्वेष्वेकसमयेनैकादयो यावत् सङ्ख्येया उपपद्यन्ते।

समये समये ह्रियमाणा सौधर्मेशा-नयोर्देवा असङ्ख्येयोत्सर्पिण्यवसर्पिणीभि-

ह्रियन्ते। एवं यावत् सहस्रारदेवाः। आनते पल्योपमासङ्ख्येयभागमात्रकालेन ह्रियन्ते, एवं यावदनुत्तराः।

| कल्पः | अवगाहना | | संहननम् | संस्थानम् समचतुरस्रम् |
|---|---|---|---|---|
| | भवधारणीये | उत्तरवैक्रिये | | |
| १-२ | ७ हस्ताः | योजनलक्षम् | - | समचतुरस्रम् |
| ३-४ | ६ हस्ताः | योजनलक्षम् | - | समचतुरस्रम् |
| ५-६ | ५ हस्ताः | योजनलक्षम् | - | समचतुरस्रम् |
| ७-८ | ४ हस्ताः | योजनलक्षम् | - | समचतुरस्रम् |
| ९-१२ | ३ हस्ताः | योजनलक्षम् | - | समचतुरस्रम् |
| ग्रैवे० | २ हस्ताः | - | - | समचतुरस्रम् |
| अनु० | १ हस्तः | - | - | समचतुरस्रम् |

| कल्पः | देहवर्णः | लेश्या | सम्यक्/मिथ्या/मिश्रदृष्टिः |
|---|---|---|---|
| १-२ | उत्तप्तकनकवर्णः | तेजो. | ३ |
| ३-४ | पद्मकेसरगौराः | पद्म. | ३ |
| ५ | आर्द्रमधुकवर्णाः | पद्म. | ३ |
| ६-८ | आर्द्रमधुकवर्णा | शुक्ल. | ३ |
| ९-१२ | आर्द्रमधुकवर्णा | शुक्ल. | ३ |
| ग्रैवे. | आर्द्रमधुकवर्णा | शुक्ल. | ३ |
| अनु. | परमशुक्ला. | परमशुक्ल. | सम्यग्दृष्टिः |

| कल्पः | जघन्योऽवधिः | उत्कृष्टोऽवधिः | |
|---|---|---|---|
| | | ऊर्ध्वम् | अधः |
| १-२ | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | रत्नप्रभाया अधस्तनचरमान्तः |
| ३-४ | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | शर्कराप्रभाया अधस्तनचरमान्तः |
| ५-६ | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | वालुकाप्रभाया अधस्तनचरमान्तः |

| कल्पः | जघन्योऽवधिः | उत्कृष्टोऽवधिः | |
|---|---|---|---|
| | | ऊर्ध्वम् | अधः |
| ७-८ | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | पङ्कप्रभाया अधस्तनचरमान्तः |
| ९-१० | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | धूमप्रभाया अधस्तनचरमान्तः |
| ११-१२ | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | धूमप्रभाया अधस्तनचरमान्तः |

| कल्पः | जघन्योऽवधिः | उत्कृष्टोऽवधिः | |
|---|---|---|---|
| | | ऊर्ध्वम् | अधः |
| अधस्तनग्रै० | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | तमःप्रभाया अधस्तनचरमान्तः |
| मध्यमग्रै० | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | तमः प्रभाया अधस्तनचरमान्तः |
| उपरि.ग्रै० | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | तमस्तमःप्रभाया अधस्तनचरमान्तः |
| अनुत्तराः | अङ्गुला-सङ्ख्येयभागः | स्वविमानध्वजं यावत् | सम्न्रिलोकनाडी |

तिर्यक् तु सर्वेषामप्यसङ्ख्येयद्वीप-समुद्रा अवधिविषयः। अच्युतं यावद्वेदना-कषाय-मरण-वैक्रिय-तेजोलक्षणाः पञ्च समुद्घाताः। ग्रैवे॰ अनु॰ - वैक्रिय-तेजोवर्जं समुद्घातत्रयम्। सर्वेषामप्येषां, नास्ति क्षुत् पिपासा वा। सर्वेऽपि ते समर्था एकानेकान्येकेन्द्रियादिपञ्चेन्द्रियान्तरूपा-ण्यसङ्ख्येयानि सङ्ख्येयानि वा सम्बद्धान्यसम्बद्धानि वा विकुर्वितुम्। सत्यपि सामर्थ्ये ग्रैवेयकानुत्तरसुरा न कालत्रयेऽपि विकुर्वन्ति।

सौधर्मादिदेवानां भवधारणीयदेहा आभरणवसनरहिताः प्रकृतिस्थाः, उत्तर-वैक्रियदेहास्तु हाराद्यलङ्कृता दश दिशः प्रभासयन्तो दर्शनीयाः। एव यावदच्युतम्। ग्रैवेयकानुत्तरसुरदेहा आभरणवसनरहिताः प्रकृतिस्थाः।

सौधर्मेशानयोः सर्वे जीवाः पृथ्वीका-यिकतया यावद्वनस्पतिकायिकतया देवतया देवीतयाऽऽसन - शयनतया यावद् भण्डो-पकरणतयाऽसकृदथवाऽनन्तकृत्व उपपन्न-पूर्वाः। एवं सनत्कुमारादीष्वपि, किन्तु न

देवीतया। एवं यावद् ग्रैवेयकेषु। अनुत्तरेष्वपि, किन्तु न देवतया।

नैरयिकमनुष्यदेवानामन्तरं जघन्येनान्तर्मुहूर्त्तम्, उत्कर्षतो वनस्पतिकालः। तिर्यग्योनिकस्यान्तरं जघन्येनान्तर्मुहूर्त्तम्, उत्कर्षतः सागरोपमशतपृथक्त्वं साधिकम्।

| जीवाः | अल्पबहुत्वम् |
|---|---|
| मनुष्याः | सर्वस्तोकाः |
| नैरयिकाः | असङ्ख्यगुणाः |
| देवाः | असङ्ख्यगुणाः |
| तिर्यञ्चः | अनन्तगुणाः |

॥ १०८ ॥

**पञ्चविधाः**

- एकेन्द्रियाः
  - पर्याप्ताः
  - अपर्याप्ताः
- द्वीन्द्रियाः
  - प०
  - अप०
- त्रीन्द्रियाः
  - प०
  - अप०
- चतुरिन्द्रियाः
  - प०
  - अप०
- पञ्चेन्द्रियाः
  - प०
  - अप०


| जीवः | भवस्थितिः | | कायस्थितिः (तद्भावापरित्यागः) | | अन्तरम् | |
|---|---|---|---|---|---|---|
| | जघ. | उत्कृ. | जघ. | उत्कृ. | जघ. | उत्कृ. |
| एकेन्द्रियः | अन्तर्मु. | २२००० वर्षाणि | अन्तर्मु. | वनस्ततिकालः | अन्तर्मु. | सङ्ख्येय-वर्षाधिक २००० सागराः |
| द्वी. | अन्तर्मु. | १२ वर्षाणि | अन्तर्मु. | सङ्ख्येयकालः | अन्तर्मु. | वनस्पतिकालः |
| त्री. | अन्तर्मु. | ४९ अहोरात्राणि | अन्तर्मु. | सङ्ख्येयकालः | अन्तर्मु. | वनस्पतिकालः |
| चतु. | अन्तर्मु. | ६ मासाः | अन्तर्मु. | सङ्ख्येयकालः | अन्तर्मु. | वनस्पतिकालः |
| पञ्चे. | अन्तर्मु. | ३३ सागराः | अन्तर्मु. | साधिक १००० सागराः | अन्तर्मु. | वनस्पतिकालः |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| पञ्चेन्द्रियाः | सर्वस्तोकाः |
| चतु० | विशेषाधिकाः |
| त्री० | विशेषाधिकाः |
| द्वी० | विशेषाधिकाः |
| एके० | अनन्तगुणाः |

पर्याप्तद्वीन्द्रियेभ्योऽपर्याप्तद्वीन्द्रिया असङ्ख्येयगुणाः। एवं त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रिया अपि।

| जीवाः | अल्पबहुत्वम् |
|---|---|
| पर्याप्तचतुरिन्द्रियाः | सर्वस्तोकाः |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| पर्याप्तपञ्चे० | विशेषाधिकाः |
| पर्याप्त द्वी० | विशेषाधिकाः |
| पर्याप्त त्री० | विशेषाधिकाः |
| अपर्याप्त पञ्चे० | असङ्ख्येयगुणाः |
| अपर्याप्त चतु० | विशेषाधिकाः |
| अपर्याप्त त्री० | विशेषाधिकाः |
| अपर्याप्त द्वी० | विशेषाधिकाः |
| अपर्याप्त एके० | अनन्तगुणाः |
| अपर्याप्त सेन्द्रियाः | विशेषाधिकाः |
| पर्याप्त एके० | सङ्ख्येयगुणाः |
| पर्याप्त सेन्द्रियाः | विशेषाधिकाः |
| सेन्द्रियाः | विशेषाधिकाः |


चतुर्धा
नैरयिकाः
सप्तधा
प्रथमपृथ्वीनैरयिका इत्यादयः
तिर्यग्योनिकाः
पञ्चधा
एकेन्द्रियादयः
प्राग्वन्नेयम्
मनुष्याः
सम्मूर्च्छिमाः
समयक्षेत्रे (प्रज्ञापना-वन्नेयम्)
गर्भजाः
कर्म०
अकर्म०
अन्तर्द्वीप
देवाः
चतुर्धा
भवनपत्यादयः

## (५) षड्विधाः

| जीवाः | अल्पबहुत्वम् |
|---|---|
| त्रसकायिकाः | सर्वस्तोकाः |
| तेजस्का० | असङ्ख्येयगुणाः |
| पृथ्वीका० | विशेषाधिकाः |
| अप्का० | विशेषाधिकाः |
| वायुका० | विशेषाधिकाः |
| वनस्पतिका० | अनन्तगुणाः |

॥ ११४ ॥

**षड्विधाः**

पृथ्वीकायिकाः — अप्का० — तेजस्का० — वायु० — वन० — त्रस०

अपर्याप्तपृथ्वीकायिकेभ्यः पर्याप्तपृथ्वीकायिकाः सङ्ख्येयगुणाः। एवं यावद्वनस्पतिकायिकाः। पर्याप्तत्रसकायिकेभ्योऽपर्याप्तत्रसकायिका असङ्ख्येयगुणाः।

| जीवाः | अल्पबहुत्वम् |
|---|---|
| पर्याप्ताः त्रसकायिकाः | सर्वस्तोकाः |
| अपर्याप्ताः त्रसकायिकाः | असङ्ख्येयगुणाः |
| अपर्याप्ता तेजस्का० | असङ्ख्येयगुणाः |
| अपर्याप्ता पृथ्वी० | विशेषाधिकाः |
| अपर्याप्ता अप्का० | विशेषाधिकाः |
| अपर्याप्ता वायु० | विशेषाधिकाः |
| पर्याप्ताः तेजस्का० | सङ्ख्येयगुणाः |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| पर्याप्ता० पृथ्वी० | विशेषाधिकाः |
| पर्याप्ता० अप्का० | विशेषाधिकाः |
| पर्याप्ता० वायु० | विशेषाधिकाः |
| अपर्याप्ताः वनस्पति० | अनन्तगुणाः |
| अपर्याप्ताः सकायिकाः | विशेषाधिकाः |
| पर्याप्ताः वनस्पति० | सङ्ख्येयगुणाः |
| पर्याप्ताः सकायिकाः | विशेषाधिकाः |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| पर्याप्त बादर तेजस्कायिकाः | सर्वस्तोकाः |
| पर्याप्त बादर त्रस० | असङ्ख्येयगुणाः |
| अपर्याप्त बादर त्रस० | असङ्ख्येयगुणाः |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| अपर्याप्त बादर वनस्पति० (प्रत्येक) | असङ्ख्येयगुणाः |
| पर्याप्त बादर निगोदाः | असङ्ख्येयगुणाः |
| पर्याप्त बादर पृथ्वी० | असङ्ख्येयगुणाः |
| पर्याप्त बादर अप्का० | असङ्ख्येयगुणाः |
| पर्याप्त बादर वायु० | असङ्ख्येयगुणाः |
| अपर्याप्त बादर तेजस्का० | असङ्ख्येयगुणाः |
| अपर्याप्त बादर प्रत्येकवन० | असङ्ख्येयगुणाः |
| पर्याप्त बादर निगोदाः | असङ्ख्येयगुणाः |
| पर्याप्त बादर पृथ्वी० | असङ्ख्येयगुणाः |
| पर्याप्त बादर अप्का० | असङ्ख्येयगुणाः |
| पर्याप्त बादर वायु० | असङ्ख्येयगुणाः |
| अपर्याप्त सूक्ष्म तेजस्का० | असङ्ख्येयगुणाः |
| अपर्याप्त सूक्ष्म पृथ्वी० | विशेषाधिकाः |
| अपर्याप्त सूक्ष्म अप्का० | विशेषाधिकाः |
| अपर्याप्त सूक्ष्म वायु० | विशेषाधिकाः |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| पर्याप्त सूक्ष्म तेजस्का० | सङ्ख्येयगुणाः |
| पर्याप्त सूक्ष्म पृथ्वी० | विशेषाधिकाः |
| पर्याप्त सूक्ष्म अप्का० | विशेषा० |
| पर्याप्त सूक्ष्म वायु० | विशेषाधिकाः |
| अपर्याप्त सूक्ष्म निगोदाः | असङ्ख्येयगुणाः |
| पर्याप्त सूक्ष्म निगोदाः | असङ्ख्येयगुणाः |
| पर्याप्त बादर वन० | अनन्तगुणाः |
| पर्याप्त बादराः | विशेषाधिकाः |
| अपर्याप्त बादरवन० | असङ्ख्येयगुणाः |
| अपर्याप्त बादराः | विशेषाधिकाः |
| बादराः | विशेषाधिकाः |
| अपर्याप्त सूक्ष्मवन० | असङ्ख्येयगुणाः |
| अपर्याप्त सूक्ष्माः | विशेषाधिकाः |
| पर्याप्त सूक्ष्मवन० | सङ्ख्येयगुणाः |
| पर्याप्त सूक्ष्माः | विशेषाधिकाः |
| सूक्ष्माः | विशेषाधिकाः |

**सप्तविधाः**

- नैरयिकाः
- तिर्यग्योनिकाः
- तिर्यग्योनियकः
- मनुष्याः
- मनुष्यः
- देवाः
- देव्यः

॥ १११ ॥

## (६) सप्तविधाः

| जीवाः | अल्पबहुत्वम् |
|---|---|
| मानुष्यः | सर्वस्तोकाः |
| मनुष्याः | असङ्ख्येयगुणाः |
| नैरयिकाः | असङ्ख्येयगुणाः |
| तिर्यग्योनिक्यः | असङ्ख्येयगुणाः |
| देवाः | असङ्ख्येयगुणाः |
| देव्यः | सङ्ख्येयगुणाः |
| तिर्यग्योनिकाः | अनन्तगुणाः |

**अष्टविधाः**

- प्रथमसमय-नैरयिकाः
- अप्रथमसमय-नैरयिकाः
- प्र०ति०
- अप्र०ति०
- प्र०म०
- अप्र०म०
- प्र०दे०
- अप्र०दे०

## (७) अष्टविधाः

| जीवाः | अल्पबहुत्वम् |
|---|---|
| प्रथमसमयमनुष्याः | सर्वस्तोकाः |
| अप्रथम समयमनुष्याः | असङ्ख्येयगुणाः |
| प्रथम समय नैरयिकाः | असङ्ख्येयगुणाः |
| प्रथम समय देवाः | असङ्ख्येयगुणाः |
| प्रथम समय तिर्यग्योनिकाः | असङ्ख्येयगुणाः |
| अप्रथम समय नैरयिकाः | असङ्ख्येयगुणाः |
| अप्रथम समय देवाः | असङ्ख्येयगुणाः |
| अप्रथम समय तिर्यग्योनिकाः | अनन्तगुणाः |

# (८) नवविधाः

नवविधाः

- पृथ्वी०
- अपृ०
- तेजः०
- वायु०
- वन०
- द्वि०
- त्री०
- चतु०
- पञ्चे०

# (९) दशविधाः

दशविधाः

- प्रथमसमय-एकेन्द्रियाः
- अप्रथमसमय-एकेन्द्रियाः
- प्र०द्वी०
- अप्र०द्वी०
- प्र०त्री०
- अप्र०त्री०
- प्र०च०
- अप्र०च०
- प्र०पञ्च०
- अप्र०पञ्च०

इति संसारसमापन्नजीवाभिगमाः

## = अथ सर्वजीवाभिगमः =

(१) **द्विविधाः** - सिद्धा असिद्धाश्च। सिद्धः साद्यनन्तः। असिद्धो द्विविधः - अनाद्यनन्तः, अनादिसान्तः। एष्वन्यतरस्यापि नास्त्यन्तरम्। सर्वस्तोकाः सिद्धाः, असिद्धा अनन्तगुणाः।

एवं सेन्द्रिया अनिन्द्रियाः, सकायिका

अकायिकाः, सयोगिनोऽयोगिनः, सलेश्या अलेश्या अपि वाच्याः।

यद्वा ज्ञानिनोऽज्ञानिनश्च। ज्ञानी - साद्यनन्तः सादिसान्तश्च। सादिसान्तः- जघन्येनान्तर्मुहूर्त्तम्, उत्कर्षतः साधिक ६६ सागराः। अज्ञानी - अनाद्यनन्तः, अनादि-सान्तः, सादिसान्तश्च। सादिसान्तः, जघ. अन्तर्मु०, उत्कर्षतोऽनन्तं कालम् यावत् क्षेत्रतोऽपार्धपुद्गलपरावर्त्तो देशोनः। सा-दिसान्तस्याज्ञानिनोऽन्तरम् - जघ० अन्त-र्मु०, उत्कृ० साधिक ६६ सागराः।

शेषयोरज्ञानिनोर्नास्त्यन्तरम्। ज्ञानिनः सर्व-स्तोकाः, अज्ञानिनोऽनन्तगुणाः।

यद्वा साकारोपयुक्ता अनाकारोपयुक्ताश्च। स्थितिरन्तरं च जघन्येनोत्कर्षेणाप्यन्तर्मुहूर्त्तम्। अनाकारोपयुक्ताः सर्वस्तोकाः, साकारोपयुक्ताः सङ्ख्येयगुणाः।

यद्वाऽऽहारका अनाहारकाश्च। सर्वस्तोका अनाहारकाः, आहारका असङ्ख्येयगुणाः।

यद्वा सभाषका अभाषकाश्च। सभाषकस्थितिः - जघ० १ समयः, उत्कृ.

अन्तर्मु०। अभासको द्विविधः - साद्यनन्तः, सादिसान्तश्च। सादिसान्तस्थितिः - जघ. अन्तर्मु० उत्क० अनन्तकालः - अनन्ता उत्सर्पिण्यवसर्पिण्यः, वनस्पतिकालः। साद्यनन्ताभाषकस्य नास्त्यन्तरम्। सादि-सान्तस्य जघ० १ समयः, उत्क० अन्त-र्मुहूर्त्तम्। सर्वस्तोका भाषकाः, अभाषकाः अनन्तगुणाः।

(२) **त्रिविधाः** - सम्यग्दृष्टयः, मिथ्यादृष्टयः, सम्यङ्मिथ्यादृष्ट्यः।

| जीवाः | अल्पबहुत्वम् |
|---|---|
| सम्यङ्मिथ्यादृष्टयः | सर्वस्तोकाः |
| सम्यग्दृष्टयः | अनन्तगुणाः |
| मिथ्यादृष्टयः | अनन्तगुणाः |

यद्वा पर्याप्ताः, अपर्याप्ताः, नोपर्याप्त-नोऽपर्याप्ताः। पर्याप्तस्थितिः - जघ० अन्त०, उत्क० साधिकसागरशतपृथक्त्वम्। अपर्या० - जघ० अन्तर्मु० उत्क० अन्तमु०। नोपर्या० साद्यनन्तः। पर्याप्तस्यान्तरम् - जघ० अन्तर्मु०, उत्क० अन्तर्मु०। अपर्या० जघ० अन्तर्मु०, उत्क० अन्तर्मु०। अपर्या०

जघ० अन्तर्मु०, उत्क० - साधिकसागर-शतपृथक्त्वम्। तृतीयस्य नास्त्यन्तरम्।

| जीवाः | अल्पबहुत्वम् |
|---|---|
| नोपर्याप्तनोऽपर्याप्ताः | सर्वस्तोकाः |
| अपर्याप्ताः | अनन्तगुणाः |
| पर्याप्ताः | सङ्ख्येयगुणाः |

यद्वा सूक्ष्माः, बादराः, नोसूक्ष्म-नोबादराः। यद्वा सञ्ज्ञिनः, असञ्ज्ञिनः, नोसञ्ज्ञिनोऽसञ्ज्ञिनः। यद्वा भव्याः, अभव्याः, नोभव्यनोऽभव्याः। यद्वा त्रसाः, स्थावराः, नोत्रसनोस्थावराः।

(३) चतुर्विधाः - मनोयोगिनः, वचोयोगिनः, काययोगिनः, अयोगिनः

| जीवाः | जघन्यस्थितिः | उत्कृ.स्थितिः |
|---|---|---|
| मनोयोगिनः | १ समयः | अन्तर्मु० |
| वचोयोगिनः | १ समयः | अन्तर्मु० |
| काययोगिननः | अन्तर्मु० | वनस्पतिकालः |
| अयोगिनः | साद्यनन्ताः | |

| अन्तरम् | जघन्यम् | उत्कृष्टम् |
|---|---|---|
| मनोयोगिनः | अन्तर्मु० | वनस्पतिकालः |
| वचोयोगिनः | अन्तर्मु० | वनस्पतिकालः |

| अन्तरम् | जघन्यम् | उत्कृष्टम् |
| --- | --- | --- |
| काययोगिनः | १ समयः | अन्तर्मु० (औदा.शरीरपर्याप्ति समाप्त्यपेक्षयाः) |
| अयोगिनः | नास्ति | |

| जीवाः | अल्पबहुत्वम् |
| --- | --- |
| मनोयोगिनः | सर्वस्तोकाः |
| वचोयोगिनः | सङ्ख्येयगुणाः |
| अयोगाः | अनन्तगुणाः |
| काययोगिनः | अनन्तगुणाः |

यद्वा स्त्रीवेदकाः, पुरुषवेदकाः, नपुंसकवेदकाः, अवेदकाः। यद्वा चक्षुर्दर्शनिनः, अचक्षुर्दर्शनिनः, अवधिदर्शनिनः, केवलदर्शनिनः। यद्वा संयताः, असंयताः, संयतासंयताः, नोसंयतनोऽसंयतनोसंयतासंयताः।

(४) **पञ्चविधाः** - क्रोधकषायिणः, मानकषायिणः, मायाकषायिणः, लोभकषायिणः, अकषायिणः।

| जीवाः | जघन्यस्थितिः | उत्कृ०स्थि० | जघ०अन्तरम् | उत्कृ० अन्तरम् |
| --- | --- | --- | --- | --- |
| क्रोधक० | अन्तर्मु० | अन्तर्मु. | १ समयः | अन्तर्मु० |
| मानक० | अन्तर्मु० | अन्तर्मु. | १ समयः | अन्तर्मु० |
| मायाक० | अन्तर्मु० | अन्तर्मु. | १ समयः | अन्तर्मु० |
| लोभक० | १ समयः | अन्तर्मु. | अन्तर्मु. | अन्तर्मु० |
| सादिसान्ता-कषायी | १ समयः | अन्तर्मु. | अन्तर्मु. | अनन्त-कालः |

साद्यनन्तस्याकषायिणो नास्तित्यन्तरम्, तत्त्वादेव।

| जीवाः | अल्पबहुत्वम् |
|---|---|
| अकषायिणः | सर्वस्तोकाः |
| मानकषायिणः | अनन्तगुणाः |
| क्रोधक० | विशेषाधिकाः |
| मायाक० | विशेषाधिकाः |
| लोभक० | विशेषाधिकाः |

यद्वा नैरयिकाः, तिर्यग्योनिकाः, मनुष्याः, देवाः, सिद्धाः।

(५) **षड्विधाः** - आभिनिबोधिक-ज्ञानिनः, यावत् केवलज्ञानिनः, अज्ञानिनः।

| **जीवाः** | **अल्पबहुत्वम्** |
|---|---|
| मनःपर्यवज्ञानिनः | सर्वस्तोकाः |
| अवधिज्ञानिनः | असङ्ख्येयगुणाः |
| आभिनि०- | स्वस्थाने तुल्या |
| श्रुतज्ञा० | विशेषाधिकाः |
| केवलज्ञानिनः | अनन्तगुणाः |
| अज्ञानिनः | अनन्तगुणाः |

यद्वा एकेन्द्रिया यावत् पञ्चेन्द्रियाः, अनीन्द्रियाः। यद्वौदारिकशरीरिणो यावत्

कार्मणशरीरिणः, अशरीरिणः।

(६) **सप्तविधाः** - पृथ्वीकायिका यावत् त्रसकायिकाः, अकायिकाः। यद्वा कृष्णलेश्या यावत् शुक्ललेश्याः, अलेश्याः।

| **जीवाः** | **अल्पबहुत्वम्** |
|---|---|
| शुक्ललेश्याः | सर्वस्तोकाः |
| पद्मलेश्याः | सङ्ख्येयगुणाः |
| तेजोलेश्याः | सङ्ख्येयगुणाः |
| अलेश्याः | अनन्तगुणाः |

| जीवाः | अल्पबहुत्वम् |
|---|---|
| कापोतलेश्याः | अनन्तगुणाः |
| नीललेश्याः | विशेषाधिकाः |
| कृष्णलेश्याः | विशेषाधिकाः |

(७) **अष्टविधाः** - आभिनिबोधिकज्ञानिनो यावत् केवलज्ञानिनः, मत्यज्ञानिनो यावद्विभङ्ज्ञानिनः। यद्वा नैरयिकाः, तिर्यग्योनिकाः, तिर्यग्योनिक्यः, मनुष्याः, मानुष्यः, देवाः, देव्यः, सिद्धाः।

(८) **नवविधाः** - एकेन्द्रिया यावत्

चतुरिन्द्रियाः, नैरयिकाः, तिर्यग्योनिकाः, मनुष्याः, देवाः, सिद्धाः। यद्वा प्रथमाप्रथमसमयनैरयिकादयः सिद्धाश्च।

**(९) दशविधाः** - पृथ्वीकायिका यावद्वनस्पतिकायिकाः, द्वीन्द्रिया यावत् पञ्चेन्द्रियाः, अनिन्द्रियाः। यद्वा प्रथमाप्रथमसमयनैरयिकादयः, प्रथमाप्रथमसमयसिद्धाश्च।

| **जीवाः** | **अल्पबहुत्वम्** |
|---|---|
| प्रथमसमय सिद्धाः | सर्वस्तोकाः |
| प्रथमसमय मनुष्याः | असङ्ख्येयगुणाः |


| जीवाः | अल्पबहुत्वम् |
|---|---|
| अप्रथम समय मनुष्याः | असङ्ख्येयगुणाः |
| प्रथम समय नैरयिकाः | असङ्ख्येयगुणाः |
| प्रथम समय देवाः | असङ्ख्येयगुणाः |
| प्रथम समय तिर्यञ्चः | असङ्ख्येयगुणाः |
| अप्रथम समय नैरयिकाः | असङ्ख्येयगुणाः |
| अप्रथम समय देवाः | असङ्ख्येयगुणाः |
| अप्रथम समय सिद्धाः | अनन्तगुणाः |
| अप्रथम समय तिर्यञ्चः | अनन्तगुणाः |

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः

कर्मारिशून्यनेत्रे वैक्रमेऽब्दे (वि.सं.२०६८)
सम्पन्न इति शम्।

## COMING FOR YOU

# અમૃતનો અવતાર





મૂળકાર

**મહો. શ્રીયશોવિજયજી મહારાજા**

ટીકાકાર

**આ. શ્રી કલ્યાણબોધિસૂરિજી**

# YES, IT'S COMING




મૂળકાર


**અજ્ઞાત પ્રાચીન મહર્ષિ**

ટીકાકાર

**પ.પૂ.આ. શ્રી કલ્યાણબોધિસૂરિજી**

DON'T MISS IT


# મુનિજીવનની અણમોલ મૂડી




પ્રાચીનશ્રુતોદ્ધારક

પ.પૂ.આ. શ્રી હેમચન્દ્રસૂરીશ્વરજી મહારાજા

# *Don't Miss it.*




मूलकाराः

प.पू. श्रीप्रतिप्रभुसूरयः

टीकाकाराः

प.पू. श्रीकल्याणबोधिसूरयः

❁ લાભાર્થી ❁

**શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ**

એમરલ્ડ એપાર્ટમેન્ટ,
અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના

૧૩૧